मुक्तस्वाध्यायपीठम्
(Institute of Distance Education)
राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः)

FJAB-01
फलितज्योतिषम्
आचार्यसेतुः, प्रथमपत्रम्

मुहूर्त्तचिन्तामणिः

(शुभाशुभप्रकरणम्)

खण्डः
१

ग्रन्थप्रवेशः

FJAB-01

मुक्तस्वाध्यायपीठम्
(Institute of Distance Education)
राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः)

मुहूर्त्तचिन्तामणिः
(शुभाशुभविचारः)

फलितज्योतिषाचार्यसेतुः,
प्रथमपत्रम्

खण्डः

१

ग्रन्थप्रवेशः

पुरोवाक् - प्रो. राधावल्लभत्रिपाठी

प्रथमः पाठः ०७-२०

द्वितीयः पाठः २१-३९

तृतीयः पाठः ४०-५१

चतुर्थः पाठः ५२-६२

प्रधानसम्पादकः

प्रो॰ राधावल्लभत्रिपाठी
कुलपतिः, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

पाठलेखनम्

उमाकान्त तिवारी
कनिष्ठ अनुसन्धाता
राष्ट्रियसंस्कृतसंस्थानम् (मा.वि.वि.)
मुक्तस्वाध्यायपीठम्, नवदेहली
(१-४ पाठाः)

सम्पादनम्

डा. श्यामदेवमिश्रः
वरिष्ठसहायकाचार्यः, मु.स्वा.पीठम्
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

पाठ्यक्रमसंयोजनम्

डॉ. श्यामदेवमिश्रः
वरिष्ठसहायकाचार्यः, मु.स्वा.पीठम्
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

प्रकाशनम्

डा. रमाकान्तपाण्डेयः
निदेशकः, मुक्तस्वाध्यायपीठम्
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

प्रकाशनवर्षम् : २०१३, पुनर्मुद्रणम् : २०१४

ISBN : 978-93-82091-48-6

© **राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१४**

सर्वाधिकारः सुरक्षितः। नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानस्य लिखितरूपेणानुमतिम् अप्राप्य येन केनापि माध्यमेन अस्याः पाठ्यसामग्र्याः कञ्चिदप्यंशं पुनः प्रस्तोतुम् अनुमतिः नास्ति।
प्रयुक्तकागदम् - Agro-based environment Friendly.

पृष्ठविन्यासः

राजीवकुमारसिंहः
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

रमाकान्तशर्मा
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

पुरोवाक्

राष्ट्रियसंस्कृतसंस्थानं संस्कृतपरम्पराणां प्रचारे प्रसारे च सर्वथा दत्तावधानं विद्यते। निखिलेऽपि भारते संस्थानस्याऽस्य दशपरिसरा विलसन्ति। तेषु तस्मिन् तस्मिन् शास्त्रे कृतभूरिपरिश्रमा आचार्याः तानि तानि शास्त्राणि अध्यापयन्ति। तत्र विविधेषु विद्याप्रस्थानेषु दीक्षां समवाप्य अस्माकम् अनूचानाः शिष्याः सर्वासु दिक्षु संस्कृतपरम्पराया ध्वजम् उत्तोलयन्ति स्थापयन्ति भारतभारत्या नवनवान् मानदण्डान् आविष्कुर्वन्ति च सततं शास्त्रपरम्परासु अभिनवाः सम्भावनाः।

एकविंशशतकम् इदं विद्यते नवसम्भावनानां नवाविष्काराणां नवप्रयोगाणां च कालः। कालेऽस्मिन् नूतनप्रविधीनां वैज्ञानिकसंसाधनानां च प्रयोगेण संस्कृताध्ययनक्षेत्रेऽपि नवा दिश उन्मील्यन्ते। तदेतत्सर्वं मनसि निधाय राष्ट्रियसंस्कृतसंस्थानं दूरशिक्षामाध्यमेन पारम्परिकसंस्कृत-शास्त्राणाम् अध्यापनाय प्रयतते। तदर्थं संस्थानमुख्यालये मुक्तस्वाध्यायपीठनाम्ना स्वतन्त्रः प्रकल्पः संस्थापितः। यस्य स्वाध्यायकेन्द्राणि जम्मू-जयपुर-गुरुवायुर-शृङ्गेरीप्रभृतिसंस्थानपरिसरेषु स्थापितानि सन्ति। एतेन प्रयासेन देशस्य कोणे कोणे स्थिताः शास्त्ररसपिपासवः जिज्ञासवः पुराणीमपि चिरतारुण्यप्राप्तां प्राचीनामपि युगानुरूपां भारतीयां सकलजनहितकारिणीं शास्त्रशिक्षां प्राप्नुवन्ति। कक्षासु नियमितच्छात्रान् अध्यापनपटवः प्राध्यापका यया शैल्या पाठयन्ति तयैव सरलसरलया पद्धत्या लिखितेयं पाठ्यसामग्री भवतः/भवत्या हस्ते विद्यते। विभिन्नेषु संस्थानपरिसरेषु तत्र तत्र नियुक्ताः प्राध्यापका एव शिक्षयन्ति। दूरस्थशिक्षामाध्यमेन अधीयानानां कृते पुनः न केवलं संस्थानस्य प्राध्यापकैः अपि तु राष्ट्रे तस्मिन् तस्मिन् विद्याप्रस्थाने सुनिपुणैः आचार्यैः लिखिता सङ्कलिता सम्पादिता चेयं पाठ्यसामग्री मुक्तस्वाध्यायपीठेन प्रकाश्य प्रेष्यत इति विशेषः।

पूर्वं सत्रद्वये दूरशिक्षामाध्यमेन व्याकरणसाहित्यशास्त्रयोरेव आचार्यपाठ्यसामग्री छात्राणां कृते प्रेषिता। नूतनेऽस्मिन् सत्रे सेयं व्याकरण-साहित्य-फलितज्योतिषशास्त्रेषु शास्त्रावगाहिनीत्याख्यं सेतुपाठ्यक्रममपि विषयीकरोतीति शास्त्राध्ययनप्रकर्षोऽयं जिज्ञासूनां महते हर्षाय उपकाराय ज्ञानाय च कल्प्यते। क्रमेऽस्मिन् नाट्यशास्त्र-पालि-प्राकृत-भाषानुवादादिविविधेषु विषयेषु तथैव शारीरिकशिक्षा-योगशिक्षाप्रभृतिषु प्रमाणपत्रीयपाठ्यक्रमा अपि नातिचिरम् आरप्स्यन्ते। मुक्तस्वाध्यायपीठस्य प्रयासैरेभिः तासु तासु परम्परासु दीक्षिताः सन्तः अध्येतारः भारतवर्षस्य गौरवाभिवृद्धये समधिकतरं प्रयासं विधास्यन्तीति दूरशिक्षायाः पाठ्यक्रमेषु प्रवेशं प्राप्तवतः विद्यार्थिवृन्दान् शुभकामनाभिः सभाजयन् पाठ्यसामग्र्या अस्याः निर्माणे समुल्लासे च स्वप्रातिभं साहाय्यं दत्तवतः विदुषः मुक्तस्वाध्यायपीठस्य प्राध्यापकान् कर्मचारिणश्च वर्धापनततिभिः पुरस्करोति-

(प्रो. राधावल्लभत्रिपाठी)
कुलपतिः
राष्ट्रियसंस्कृतसंस्थानम्,
नवदेहली

पत्रपरिचयः

मुक्तस्वाध्यायपीठेन प्रवर्तिते ज्योतिषाचार्यसेतुपाठ्यक्रमस्य प्रथमे पत्रे भवतः स्वागतम्। ज्योतिषाचार्यसेतुपाठ्यक्रमस्य प्रथमे पत्रे मुहूर्त्तचिन्तामणिग्रन्थमाश्रित्य "शुभाशुभविचारः" इति विषयः निर्धारितः वर्तते। ज्योतिषशास्त्रस्य प्रमुखः विवेच्यविषयः वर्तते "शुभाशुभकालनिदर्शनम्" विविधवैदिक-लौकिककर्मसु शुभाशुभकालस्य ज्ञानम् अत्यावश्यकम्। शुभे काले कार्यस्य करणेन कार्ये शुभत्वं तथा च अशुभकाले करणेन अनिष्टादिकं भवति। अतः शुभत्वकामनया कार्यं शुभे काले एव करणीयम्। अतः शुभाशुभकालज्ञानार्थं भवतः पाठ्यक्रमेऽपि "शुभाशुभविचारः" इति प्रथमपत्ररूपेण समायोजितः। पत्रेऽस्मिन् चत्वारः खण्डाः सन्ति एवं तेषु खण्डेषु षोडश पाठाः नियोजिता वर्तन्ते। ते एवम् -

प्रथमः खण्डः–

प्रथमः पाठः	–	ज्योतिषपरिचयाध्यायः
द्वितीयः पाठः	–	त्रिस्कन्धविवेचनम्
तृतीयः पाठः	–	मुहूर्त्तज्ञानम्
चतुर्थः पाठः	–	ग्रन्थपरिचयः

द्वितीयः खण्डः–

पञ्चमः पाठः	–	अनुबन्धचतुष्टय, पञ्चाङ्गपरिचयः
षष्ठः पाठः	–	तिथिनां स्वामिनः, नन्दादिसंज्ञा, निषिद्धतिथिनक्षत्राणां परिचयः
सप्तमः पाठः	–	क्रकचादि-निन्द्ययोगाः निषिद्धशून्यतिथयश्च
अष्टमः पाठः	–	चैत्रादिषु शून्यराशिनक्षत्राणि तिथिनक्षत्रसम्बन्धिदोषाश्च

तृतीयः खण्डः–

नवमः पाठः	–	दग्धलग्नादि-ज्ञानं मधुसर्पिष् योगाः च
दशमः पाठः	–	आनन्दादि-योगविचारः
एकादशः पाठः	–	रवियोगविचारः,सर्वार्थ सिद्धिः, उत्पात-मृत्यु-काण-सिद्धियोगाः
द्वादशः पाठः	–	शुभकृत्येषु वर्ज्यपदार्थाः पञ्चाङ्गदूषणानि

चतुर्थः खण्डः–

त्रयोदशः पाठः	–	तिथिवारेषु वर्ज्यघट्यः दुष्टयोगाश्च
चतुर्दशः पाठः	–	दुष्टयोगपरिहारः भद्राविचारश्च
पञ्चदशः पाठः	–	सिंहस्थगुर्वादिदोषविचारः
षोडशः पाठः	–	वारप्रवृत्ति-संवत्सरादि-विचारः

—•—

खण्डपरिचयः

ज्योतिषाचार्यसेतुपाठ्यक्रमस्य प्रथमे पत्रे प्रथमे खण्डे भवतः स्वागतम्। यथा भवान् जानाति प्रथमे पत्रे "शुभाशुभविचारः" इति विषयः समायोजितः वर्तते। विषयोऽयं चतुर्षु खण्डेषु विभाजितः वर्तते। तेष्वयं प्रथमः खण्डः "ग्रन्थप्रवेशः" इति नाम्ना अभिहितः। खण्डेऽस्मिन् सन्ति चत्वारो पाठाः। ते पाठा एवं सन्ति -

प्रथमः पाठः - ज्योतिषपरिचयाध्यायः।

द्वितीयः पाठः - त्रिस्कन्धविवेचनम्।

तृतीयः पाठः - मुहूर्त्तज्ञानम्।

चतुर्थः पाठः - ग्रन्थपरिचयः।

तत्र प्रथमे पाठे आदौ ज्योतिष शब्दस्य उत्पत्तिपरिभाषा निरूपिते स्तः। अनन्तरं ज्योतिषशास्त्रस्य वेदाङ्गेषु स्थानम्, ज्योतिषशास्त्रस्य वैदिककाले वेदाङ्गकाले सिद्धान्तकाले आधुनिककाले च ज्योतिषशास्त्रस्य स्थितिः निरूपिता वर्तते। ततः ज्योतिषशास्त्रस्य प्रमुखाचार्याणां वर्णनमस्ति।

द्वितीये पाठे ज्योतिषशास्त्रस्य स्कन्धानां विवेचनमस्ति। पुरा ज्योतिषशास्त्रस्य त्रयः स्कन्धाः सिद्धान्त-संहिता-होराः आसन् । परन्तु कालान्तरेण प्रश्न तथा शकुन इत्यनयोः मेलनेन पञ्च स्कन्धाः निर्मिताः। अस्मिन् पाठे ज्योतिषशास्त्रस्य पञ्चस्कन्धानां निरूपणं तेषां वर्ण्यविषयाः एवं तेषां वैशिष्ट्यञ्च निरूपितमस्ति। ततः मुहूर्त्तविज्ञानस्य ज्योतिषशास्त्रे कस्मिन् स्कन्धे वर्णनमस्ति इत्यस्य विषये चर्चा अस्ति।

तृतीये पाठे मुहूर्त्तः इत्यस्य विषये चर्चा क्रियते। लोके शुभाशुभकालः शुभ-अशुभ मुहूर्त्तः इति नाम्ना अभिज्ञायन्ते। पाठेऽस्मिन् मुहूर्त्त शब्दस्य परिभाषा विविधमुहूर्त्तानां नामानि, मुहूर्त्तज्ञानस्य आवश्यकता मुहूर्त्तस्य महत्त्वं तथा मुहूर्त्तदोषस्य दुष्परिणामः इति विषये चर्चा वर्तते। ततः मुहूर्त्तसम्बन्धि-विविधग्रन्थानां परिचयः दीयते।

चतुर्थे पाठे मुहूर्त्तग्रन्थेषु शिरोमणिभूतस्य मुहूर्त्तचिन्तामणिग्रन्थस्य परिचयः दीयते। तत्र मुहूर्त्तचिन्तामणिग्रन्थस्य आवश्यकता तस्य वैशिष्ट्यं च वर्णितम्। पुनः ग्रन्थेऽस्मिन् विविधप्रकरणेषु वर्णितानाम् विषयानां निरूपणमस्ति। ततः मुहूर्त्त चिन्तामणिग्रन्थकारस्य आचार्य रामदैवज्ञस्य परिचयः निरूपितो वर्तते।

—•—

प्रथमः पाठः (ज्योतिषपरिचयाध्यायः)

पाठसंरचना

१.१ प्रस्तावना
१.२ उद्देश्यम्
१.३ ज्योतिषशास्त्रस्य सामान्यः परिचयः
१.३.१ ग्रहाः
१.३.२ नक्षत्राणि
१.३.३ ज्योतिषशब्दस्य व्युत्पत्तिः तस्य परिभाषा च
१.३.४ ज्योतिषशास्त्रस्य वैशिष्ट्यम्
१.४ ज्योतिषशास्त्रस्य वेदाङ्गत्वप्रतिपादनम्
१.४.१ वेदाङ्गम्
१.४.२ ज्योतिषस्य वेदाङ्गत्वम्
१.४.३ वेदचक्षुः ज्योतिषम्
१.४.४ लगधप्रणीतं वेदाङ्गज्योतिषम्
बोधप्रश्नाः
१.५ ज्योतिषशास्त्रस्य क्रमिकविकासः
१.५.१ वैदिककाले ज्योतिषशास्त्रस्य स्थितिः
१.५.२ वेदाङ्गकाले ज्योतिषशास्त्रस्य स्थितिः
१.५.३ सिद्धान्तकाले ज्योतिषशास्त्रस्य स्थितिः
१.५.४ आधुनिककाले ज्योतिषशास्त्रस्य स्थितिः
१.६ ज्योतिषशास्त्रस्य प्रमुखा आचार्याः
बोधप्रश्नाः
१.७ सारांशः
१.८ शब्दावली
१.९ सन्दर्भग्रन्थाः
१.१० सहायकग्रन्थाः
१.११ बोधप्रश्नोत्तराणि
१.१२ अभ्यासप्रश्नाः

१.१ प्रस्तावना

कस्यचित् अपि कार्यस्य करणात् पूर्वम् अस्माकं मनसि इयं जिज्ञासा भवति यत् कीदृशम् इदं कार्यम्? अस्य कार्यस्य प्रकृतिः का? अस्य कार्यस्य कारणं किम्? किमर्थं इदम् कार्यं कर्त्तव्यम्? अस्माकं जीवने तस्य कार्यस्य का उपयोगिता अस्ति इत्यादि।

तथैव कस्यचित् शास्त्रस्य अध्ययनात् पूर्वम् अपि तस्य शास्त्रस्य इतिहासः, तस्य शास्त्रस्य प्रकृतिः, तस्मिन् शास्त्रे के-के विषयाः वर्णिताः, तस्य शास्त्रस्य उपयोगित्वं किम् इत्यादिविषये जिज्ञासा अवश्यमेव भवति। अतः परम्परया ज्योतिषशास्त्रस्य मुहूर्त्तचिन्तामणिः ग्रन्थस्य पठनात् पूर्वम् भवतः मनसि इयं जिज्ञासा अवश्यमेव भविष्यति यत् यदि मुहूर्त्तचिन्तामणिः ज्योतिषशास्त्रस्य ग्रन्थः अस्ति तर्हि ज्योतिषशास्त्रस्य उत्पत्तिः कदा अभवत्? ज्योतिषशास्त्रस्य के आचार्याः सन्ति? ज्योतिषशास्त्रे किं-किं पठनीयम् ? अस्माकं जीवने ज्योतिषशास्त्रस्य का उपयोगिता वर्तते? मुहूर्त्तचिन्तामणेः अतिरिक्तम् अपि ज्योतिषशास्त्रस्य अन्ये ग्रन्थाः सन्ति न वा? इत्यादयः। एतेषां जिज्ञासानां समाधानाय एव प्रस्तुते प्रथमे पाठे ज्योतिषशास्त्र-विषये एव

© राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१४

चर्चा कृता अस्ति। पाठेऽस्मिन् ज्योतिषशास्त्रस्य उत्पत्तिः, तस्य परिभाषा, वेदाङ्गेषु तस्य स्थानम्, ज्योतिषशास्त्रस्य स्थितिः, ज्योतिषशास्त्रस्य अस्माकं जीवने उपयोगिता, ज्योतिषशास्त्रे अध्येतव्याः विषयाः निरूपिताः वर्तन्ते।

१.२ उद्देश्यम्

एतस्य पाठस्य अध्ययनेन भवान्–

- ज्योतिषशास्त्रस्य उत्पत्तिं निरुपयिष्यति।
- ज्योतिषशास्त्रस्य लक्षणं निरुपयितुं समर्थो भविष्यति।
- ज्योतिषशास्त्रस्य वेदाङ्गत्वं महत्त्वञ्च प्रतिपादयितुं शक्ष्यति।
- ऐतिह्यक्रमेण ज्योतिषस्य स्थितिं वर्णयितुं शक्ष्यति।
- ज्योतिषशास्त्रस्य प्रसिद्धाचार्याणां विषये वक्तुं शक्ष्यति।
- अस्माकं जीवने ज्योतिषशास्त्रस्य उपयोगितां प्रतिपादयितुं शक्ष्यति।

१.३ ज्योतिषशास्त्रस्य सामान्यपरिचयः

ग्रह–नक्षत्रादीनां प्रतिपादकं शास्त्रं ज्योतिषशास्त्रम्। अर्थात् यस्मिन् शास्त्रे ग्रह–नक्षत्रादीनां विषये वर्णनं भवति तत् ज्योतिषशास्त्रम् भवति। अतः के ग्रहाः? कानि नक्षत्राणि? एतेषां ज्योतिषशास्त्रेण सह कः सम्बन्धः? इत्यादिविषये ज्ञानम् आवश्यकम्। अतः पूर्वम् एतेषां विषये एव जानीमः –

१.३.१ ग्रहाः

खगोले विविधाः पिण्डाः स्थिताः वर्तन्ते, तेषु केचन चलायमानाः सन्ति तथा च केचन स्थिराः सन्ति। तेषु चलितेषु पिण्डेषु ये भ्रमन्तः राशीन् आकाशीयखण्डविशेषान् गृह्णन्तः दृश्यन्ते, तेषां ग्रहसंज्ञा भवति। अर्थात् खगोले ये पिण्डाः भ्रमन्तः राशीनां स्पर्शं कुर्वन्तः दृश्यन्ते ते ग्रहाः भवन्ति। उक्तं च बृहत्पाराशरन्तः होराशास्त्रे –

"गच्छन्तो भानि गृह्णन्ति सततं ये तु ते ग्रहाः"

पदच्छेदः

गच्छन्तः / भानि / गृह्णन्ति / सततं / ये / तु / ते / ग्रहाः।

अन्वयः

ये सततं गच्छन्तः भानि गृह्णन्ति ते ग्रहाः (सन्ति)।

प्रतिपदार्थः

ये = ये पिण्डाः, सततं = निरन्तरं, गच्छन्तः = भ्रमन्तः, भानि = नक्षत्राणि, गृह्णन्ति = स्पर्शं कुर्वन्ति, ते = ते पिण्डाः, ग्रहाः = ग्रहसंज्ञकाः (सन्ति)।

व्याख्या

बृहत्पराशरहोराशास्त्रे ग्रहाणां परिभाषा निर्दिष्टा अस्ति यत् –

"आकाशस्थपिण्डेषु ये पिण्डाः निरन्तरं भ्रमन्तः नक्षत्राणि (अथवा राशीन्) स्पर्शं कुर्वन्ति ते पिण्डाः ग्रह-संज्ञकाः कथ्यन्ते।

ज्योतिषशास्त्रे नवग्रहाः गणिताः सन्ति –

१. सूर्यः	२. चन्द्रः	३. भौमः (मंगलः)
४. बुधः	५. गुरुः	६. शुक्रः
७. शनिः	८. राहुः	९. केतुः इति।

१.३.२ नक्षत्राणि

"न क्षरति (चलति) इति नक्षत्रम्" इति नक्षत्रपदस्य व्युत्पत्तिः। खगोले स्थितेषु पिण्डेषु ये केचन् स्थिराः पिण्डाः तेषां नक्षत्र संज्ञा भवति। यथोक्तं बृहत्पराशर होराशास्त्रे –

"तानि नक्षत्रनामानि स्थिरस्थानानि यानि वै" इति।

पदच्छेदः

तानि/ नक्षत्र/ नामानि/ स्थिर/ स्थानानि/ यानि/ वै।

अन्वयः

यानि स्थिरस्थानानि तानि वै नक्षत्रनामानि (कथ्यन्ते)।

प्रतिपदार्थः

यानि = यानि पिण्डानि, स्थिरस्थानानि = स्वस्थाने एव स्थिराः भवन्ति तानि स्थिरस्थानानि, तानि = तानि पिण्डानि, वै, नक्षत्रनामानि = नक्षत्रनामधेयाः कथ्यन्ते।

व्याख्या

यद्यपि बहवः स्थिरपिण्डाः खगोले स्थिताः सन्ति तथापि तेषां गुण-आकार-स्थिति-समानताधारेण सप्तविंशतिभिः विभाजनं कृतम्। ते सप्तविंशतिः एवं सन्ति –

१. अश्विनी	२. भरणी	३. कृत्तिका	४. रोहिणी
५. मृगशिरा	६. आर्द्रा	७. पुनर्वसू	८. पुष्यः
९. आश्लेषा	१०. मघा	११. पूर्वाफाल्गुनी	१२. उत्तराफाल्गुनी
१३. हस्तः	१४. चित्रा	१५. स्वाती	१६. विशाखा
१७. अनुराधा	१८. ज्येष्ठा	१९. मूलम्	२०. पूर्वाषाढ़ा
२१. उत्तराषाढ़ा	२२. श्रवणः	२३. धनिष्ठा	२४. शतभिषा
२५. पूर्वाभाद्रपद्	२६. उत्तराभाद्रपद्	२७. रेवती इति।	

एतेषां ग्रहाणाञ्च नक्षत्र पिण्डानां ज्योतीषिम् इत्यपि संज्ञा अस्ति। यतोहि एतेषु ज्योतिः (प्रकाशः) वर्तते। ये केचन् पिण्डाः प्रकाशहीनाः सन्ति तेऽपि सूर्यस्य प्रकाशेन प्रकाशिताः सन् प्रकाशपुञ्ज इव दृश्यन्ते।

© राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१४

१.३.३ ज्योतिषशब्दस्य व्युत्पत्तिः, तस्य परिभाषा

ज्योतिष शब्दः ज्योतिस् शब्दात् निष्पन्नः यस्य अर्थः प्रकाशः भवति। ग्रह-नक्षत्रादिषु प्रकाशस्य विद्यमानत्वात् प्रकाश इति शब्दस्य ज्योतिषापरपर्यायत्वात् तेषां ज्योतींषि इति संज्ञा भवति।

अतः "ज्योतींषि ग्रह-नक्षत्राणि, तेषां विवेचनम् अस्ति यस्मिन् शास्त्रे तच्छास्त्रं ज्योतिषशास्त्रम्" इति।

प्रश्न उदेति यत् ग्रह-नक्षत्रादीनां कीदृग् विवेचनं ज्योतिषशास्त्रे क्रियते?

"नक्षत्रग्रहताराकादि-ज्योति-पिण्डानां-स्थिति-गति-प्रभावादि वर्णनपरं शास्त्रमेव ज्योतिषशास्त्रम्"।

१.४ ज्योतिषशास्त्रस्य वेदाङ्गत्वप्रतिपादनम्

ज्योतिषशास्त्रस्य सामान्यः परिचयः भवता ज्ञातः। पुनः ज्योतिषशास्त्रस्य वेदाङ्गत्वं कथम्? वेदस्य अङ्गेषु ज्योतिषशास्त्रस्य किं स्थानम् इत्यादि ज्ञातव्यं। तदर्थं वेदाङ्गविषये ज्ञानम् आवश्यकम् अतः प्रथमं तावत् विषयेऽस्मिन् चर्चा विधीयते।

१.४.१ वेदाङ्गम्

वेदस्य अङ्गम् वेदाङ्गम्। वेदाः गूढार्थकाः सन्तिः। तेषां रहस्यमयम् अर्थज्ञानं न सुलभं भवति। अतः येन प्रकारेण शरीरस्य क्रियादीनां ज्ञानार्थं तस्य शरीरस्य अङ्ग-प्रत्यङ्गानां ज्ञानम् आवश्यकम् तेनैव प्रकारेण वेदरूपी शरीरस्य रहस्यज्ञानार्थं तस्य अङ्गेषु विभाजनं कृत्वा ज्ञानं कर्त्तव्यम् इतिधिया महर्षिभिः वेदस्य षड् अङ्गानि कृतानि।

तानि अङ्गानि - घ्राणम्, श्रोत्रम्, नेत्रम्, मुखम्, हस्तौ, पादौ इति।

तत्र –

वेदस्य घ्राणम्	–	शिक्षा
वेदस्य श्रोत्रम्	–	निरुक्तम्
वेदस्य नेत्रम्	–	ज्योतिषम्
वेदस्य मुखम्	–	व्याकरणम्
वेदस्य हस्तौ	–	कल्पः
वेदस्य पादौ	–	छन्दः

भास्कराचार्येणाप्युक्तम् –

शब्दशास्त्रं मुखं ज्योतिषं चक्षुषी -
श्रोत्रमुक्तं निरूक्तं च कल्पः करौ।
या तु शिक्षाऽस्य वेदस्य सा नासिका
पादपद्मद्वयं छन्द आद्यैर्बुधैः॥

पदच्छेदः

शब्द /शास्त्रं /मुखं /ज्योतिषं /चक्षुषी /श्रोत्रम् /उक्तम् /निरुक्तं /च/कल्पः /करौ /

या /तु /शिक्षा / अस्य /वेदस्य / सा / नासिका / पाद / पद्म / द्वयं / छन्द / आद्यैः /बुधैः।

अन्वयः

आद्यैः बुधैः अस्य वेदस्य मुखं शब्दशास्त्रं, चक्षुषी ज्योतिषम् श्रोत्रम् निरुक्तं (तथा) च करौ कल्पः। या शिक्षा सा नासिका, (तथा) पादपद्मद्वयं छन्दः (इति) उक्तम्।

प्रतिपदार्थः

आद्यैः = प्राचीनैः, बुधैः = विद्वद्भिः, अस्य वेदस्य = वेदशास्त्रस्य, मुखं = अङ्गविशेषं, शब्दशास्त्रं = व्याकरणशास्त्रं, चक्षुषी = नेत्रे द्वे, ज्योतिषम् = ज्योतिषशास्त्रम्, श्रोत्रम् = कर्णम्, निरुक्तं = निरुक्तशास्त्रम्, (तथा) च = इतोऽपि, करौ = हस्तौ, कल्पः = कल्पशास्त्रम्, (इति)। या, शिक्षा = शिक्षाशास्त्रम्, सा, नासिका = घ्राणाङ्गम् (तथा) पादपद्मद्वयम् = चरणकमलौ, छन्दः = छन्दः शास्त्रं (इति)उक्तम्।

व्याख्या

भास्कराचार्येण स्वग्रन्थे सिद्धान्तशिरोमणौ वेदपुरुषस्य अङ्गत्वेन प्रथितानां शास्त्राणां एवं रीत्या उपस्थापनं कृतम्। तत्र शब्दानाम् अर्थानाञ्च साध्वसाधुत्वानुशीलनं व्याकरणशास्त्रे भवति। शब्दं विना किमपि शास्त्रं न सम्भवति। यथा शरीरे मुखं विना मानवस्य कल्पना मुधा तथैव साधुशब्दज्ञानाभावात् व्याकरणं विना अन्यानि शस्त्राणि। अतः व्याकरणं वेदपुरुषस्य मुखरूपेण निश्चितम्। ज्योतिषशास्त्रं नेत्रभूतं। यथा नेत्रयोः सत्योः जगतः दर्शनं भवति तथैव ज्योतिषशास्त्रज्ञाने सति मनुष्यः स्वजीवने भविष्यकाले भवितव्यानां सुखदुःखादीनां दर्शनं किं वा ज्ञानं कर्तुं प्रभवति। वेदोक्तमन्त्रेषु प्रयुक्तशब्दानां निर्वचनं यस्मिन् शास्त्रे तत् निरुक्तम् इत्युच्यते। वेदास्तु आपौरुषेयाः येषां श्रवणमेव अभूत्। अतस्तन्मन्त्राणां श्रवणमाहात्म्यात् निरुक्तस्य कर्णत्वेन निर्धारणम्।

१.४.२ ज्योतिषशास्त्रस्य वेदाङ्गत्वम्

वेदाङ्गज्योतिषे उक्तम् अस्ति –

वेदा हि यज्ञार्थमभिप्रवृत्तः
कालानुपूर्वा विहिताश्च यज्ञाः।
तस्मादिदं कालविधानशास्त्रम्
यो ज्योतिषं वेद स वेद यज्ञम्॥

पदच्छेदः

वेदा/ हि/ यज्ञार्थम् / अभिप्रवृत्ताः/ कालानुपूर्वाः / विहिताः /च/ यज्ञाः/ तस्मात्/ इदं/ काल / विधान/ शास्त्रम्/ यो / ज्योतिषं / वेद / स / वेद / यज्ञम्।

अन्वयः

वेदा हि यज्ञार्थमभिप्रवृत्ताः, यज्ञाश्च कालानुपूर्वा विहिता। तस्मात् इदं कालविधानशास्त्रम् ज्योतिषं यो वेद स (एव) यज्ञम् वेद।

प्रतिपदार्थः

वेदाः = ऋगादिचत्वारो वेदाः शतपथब्राह्मणादयः उपनिषदः सूत्राणि च, हि = यतो हि, यज्ञार्थं = यज्ञ क्रिया सम्पादनार्थं , अभिप्रवृत्ताः = नियुक्ताः, यज्ञाश्च = ताः यज्ञादिक्रियाः च, कालानुपूर्वा = शुभाशुभकालाधारिताः, विहिताः = कथिताः, तस्मात् = अतः,

© राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१४

इदं = उक्तम्, कालविधानशास्त्रम् = कालप्रतिपादकं शास्त्रम्, ज्योतिषं = ज्योतिषशास्त्रं, यः = यः पुरुषः, वेद = ज्ञातवान्, स = स पुरुषः (एव) यज्ञम् = यज्ञक्रियादिकं, वेद = ज्ञातवान् ।

व्याख्या

यज्ञ-यागादीनां सम्पादनार्थं वेदाः निर्मिताः सन्ति। ते यज्ञाः कालानुपूर्वाः भवन्ति अर्थात् यज्ञ विशेषः कालविशेषे एव सम्पाद्यते। इदं ज्योतिषशास्त्रम् ग्रह-नक्षत्राणां स्थितिं विज्ञाय कार्यविशेषस्य शुभाशुभकालनिर्धारणं करोति। अनेन ज्योतिषशास्त्रेण याज्ञिकाः इदं ज्ञातुम् समर्थाः भवन्ति यत् कदा यज्ञारम्भस्य मुहूर्त्तः अस्ति, कस्मिन् काले कृतस्य यज्ञस्य समुचितं फलं मिलिष्यति इत्यादि। यतो हि ज्योतिषशास्त्रेण वेदप्रोक्तानां यज्ञादीनां सम्पादनार्थम् उचितकालस्य निर्धारणं भवति। तेन कालाधायकत्वात् वेदैकदेशत्वाच्च अस्य वेदाङ्गत्वं सिद्धयति।

१.४.३ वेद चक्षुः ज्योतिषम्

वेदाङ्गेषु ज्योतिषस्य चक्षुस्थानम् निर्धारितम् अस्ति इति भवता पूर्वमेव पठितम्। अस्य ज्योतिषशास्त्रस्य दिव्यचक्षुषा तज्ज्ञाः अप्रत्यक्षघटनाम् अपि प्रत्यक्षतया पश्यन्ति। ज्योतिषशास्त्रस्य दिव्यचक्षुषा यत् दृश्यते तद् समये प्राप्ते प्रत्यक्षतया दृश्यते अनुभूयते वा। यथा ज्योतिषस्य दिव्यचक्षुषा (ग्रहगणितक्रियया) यदि पूर्वं ज्ञातम् यत् अमुककाले ग्रहणं भविष्यति अथवा एतावत्समयानन्तरं सूर्योदयं सूर्यास्तं वा भविष्यति अथवा अस्मिन् दिने चन्द्रः न दृग्गोचरो भविष्यति वा अस्मिन् दिने पूर्णः चन्द्रः दृश्यते। तदा कथितघटना प्राप्ते काले भवत्येव। ज्योतिषशास्त्रेण पूर्वकथितघटनानां प्रत्यक्षदर्शनादेव ज्योतिषं प्रत्यक्षशास्त्रम् इति कथितम्। उक्तं च –

"प्रत्यक्षं ज्योतिषं शास्त्रम् चन्द्रार्कौ यत्र साक्षिणौ॥" इति

१.४.४ लगधप्रणीतं वेदाङ्गज्योतिषम्

वेदेषु निहितानां ज्योतिषतत्वानि परिशील्य सङ्क्षिप्तनं महर्षिलगधेन वेदाङ्गज्योतिषम् इत्याख्ये ग्रन्थे कृतम्। ग्रन्थेऽस्मिन् द्वौ भागौ स्तः। तौ क्रमशः

१. ऋग्ज्योतिषम् (आर्च ज्योतिषम् वा)

२. याजुषज्योतिषम् इति।

अथर्वज्योतिषम् इति नाम्ना तृतीयः भागोऽपि क्वचित् वेदाङ्गज्योतिषस्यैव वर्तते इति तद्ग्रन्थदर्शनेन परिज्ञायते।

अतः ऋग्ज्योतिषं, याजुषज्योतिषम्, अथर्वज्योतिषम् एते त्रयः एव अंशाः प्राप्यन्ते।

ऋग्ज्योतिषम्

ऋग्वेदस्य ज्योतिष सम्बन्धि अंशान् संगृह्य वेदाङ्गज्योतिषस्य यः अंशः निर्मितः तत् ऋग्ज्योतिषम् इति नाम्ना बोधितम्। ऋग्ज्योतिषे षटत्रिंशत् (३६) कारिकाः लभ्यन्ते। येषां सोमाकर नाम्ना केनचित् विदुषा विस्तृता तथा लघ्वी इति द्वे व्याख्ये लभ्येते। इदानीम् अस्य ग्रन्थस्य सुधाकरप्रणीता व्याख्या अपि लभ्यते। ऋग्ज्योतिषस्य प्रमुखः विवेच्यः विषयः कालज्ञानमस्ति। यस्य निर्देशः प्रारम्भे एव निर्दिष्टः अस्ति। तद्यथा –

"कालज्ञानं प्रवक्ष्यामि लगधस्य महात्मनः" इति।

याजुष्ज्योतिषम्

यजुर्वेदस्य ज्योतिषसम्बन्धिताः अंशाः यत्र निहिताः सन्ति तद् वेदाङ्गज्योतिषस्य भागः याजुष्ज्योतिषम् इत्याख्यायते। अस्मिन् ग्रन्थे एकोनपञ्चाशत् (49) श्लोकाः सन्ति। अस्य ग्रन्थस्य प्रयोजनं यज्ञादीनां सम्पादनार्थं कालनिर्देशनम् कथ्यते –

"युगस्य पञ्चवर्षस्य कालज्ञानं प्रचक्षते॥"

अनेन श्लोकांशेन इदमपि ज्ञायते यद् वेदाङ्गज्योतिषानुसारेण एकस्मिन् युगे पञ्चवर्षाणि भवन्ति। अस्यापि सोमाकारकृता सुधारकृता टीका च उपलभ्यते।

अथर्वज्योतिषम्

अथर्ववेदस्य अंशान् संङ्गृह्य निर्मितम् वेदाङ्गज्योतिषखण्डम् अथर्ववेद-ज्योतिषम् अथर्वज्योतिषं वा कथ्यते। यतो हि अथर्ववेदस्य प्रतिपाद्यविषयाः मारण-मोहन-उच्चाटनादयः वर्तन्ते, अतः तदर्थम् अथर्वज्योतिषस्यापि विवेच्यविषयः रौद्रसौम्यादिकर्म-योग्यनक्षत्राद्युल्लेखः अस्ति। शुभाशुभकर्मणः फलप्राप्तिकामनया तस्य कर्मणः कृते अभीष्टकालनिधारिकत्वात् मुहूर्त्त-प्रतिपादकत्वाच्च अस्य फलितज्योतिषेन सह सम्बन्धः अस्ति इति मन्यते। अतः अथर्वज्योतिषम् फलितज्योतिषेन सम्बन्धितम् अस्ति।

१.५ ज्योतिषशास्त्रस्य वैशिष्ट्यम्

पूर्वं भवता ज्ञातं यत् ग्रह-नक्षत्राणां विवेचकम् शास्त्रम् ज्योतिषशास्त्रम्। तर्हि कीदृशं विवेचनम् अस्ति अस्मिन् ज्योतिषशास्त्रे इति अधुना ज्योतिषशास्त्रस्य विशिष्टतां विचार्यते –

शास्त्रेऽस्मिन् समये समये ग्रहनक्षत्रादीनां स्थितिज्ञानार्थं गणितोपयुक्ताः नियमाः सन्ति। ग्रह-नक्षत्रादीनां भिन्न-भिन्नस्थितिवशात् निर्मितानां विविधयोगानां वर्णनम् अस्ति। कस्मिन् योगे उत्पन्नस्य जातकस्य किं फलं भविष्यति इत्यस्यापि विवेचनं कृतमस्ति। ग्रहाणां गति विवेचनम्, ग्रहचारवशात् उत्पन्नानां विविधमुहूर्त्तानां वर्णनं तेषां शुभत्वाशुभत्वं, कस्मिन् काले किं करणीयम्, कदा किं न करणीयम्, कदा कृते सति कार्यस्य किं फलं भविष्यति कदा (कुत्र) च कीदृश्यः उत्पातादि घटनाः भविष्यन्ति इत्यादीनां विवेचनं कृतम् अस्ति।

इत्थं भविष्यत्काले संभावितानां घटनानां पूर्वज्ञानम् ज्योतिषशास्त्रेण भवति। अतएव यः ज्योतिषशास्त्रस्य ज्ञाता भवति सः दैवं जानाति अतः दैवज्ञः कथ्यते।

ज्योतिषशास्त्रस्य ज्ञानेन भूत-भविष्य-वर्तमानेति त्रिविधकालस्य ज्ञानम् भवति। अतः ज्योतिषशास्त्रं चक्षुर्भूतेन प्रतिष्ठितम्। भवान् जानात्येव शरीरे नेत्रयोः कियत् आवश्यकता वर्तते। चक्षुषा हीनः मनुष्यः समग्रशक्तियुक्तोऽपि अन्यस्य कस्यचित् चक्षुर्युक्तमनुष्यस्य सहयोगं विना न किञ्चित् कर्त्तुं समर्थः भवति। तेनैव प्रकारेण ज्योतिषशास्त्रं विना अन्येषां शास्त्राणां स्थितिः भवति।

ज्योतिषशास्त्रस्य एवं महत्त्वं दृष्ट्वा भास्कराचार्यः लिखितवान् –

वेदचक्षुः किलेदं स्मृतं ज्योतिषं
मुख्यता चाङ्गमध्येऽस्य तेनोच्यते।
संयुतोऽपीतरैः कर्णनासादिभिः
चक्षुषाङ्गेन हीनो न किञ्चित् करः॥

© राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१४

पदच्छेदः

वेद / चक्षुः /किल /इदं /स्मृतं /ज्योतिषं /मुख्यता /च /अङ्गमध्ये /अस्य/ तेन /उच्यते / संयुतः /अपि /इतरैः /कर्णनासादिभिः /चक्षुषाङ्गेन /हीनः /न /किञ्चित् /करः।

अन्वयः

वेदचक्षुः इदं ज्योतिषं स्मृतं किल, अङ्गमध्ये अस्य मुख्यता च। तेन उच्यते इतरैः कर्णनासादिभिः संयुतोऽपि चक्षुषाङ्गेन हीनः न किञ्चित् करः।

प्रतिपदार्थः

वेदचक्षुः = वेदस्य नेत्रम्, इदं ज्योतिषं = इदं ज्योतिषशास्त्रं, स्मृतं = कथितम् इति भावः, किल = निश्चयेन, अङ्गमध्ये = शरीरस्य अङ्गेषु, अस्य = उक्तज्योतिषशास्त्रस्य, मुख्यता = प्रामुख्यं च = अपि । (अस्ति) तेन = अत एव, उच्यते = कथ्यते, इतरैः = अन्यैः, कर्णनासादिभिः = शरीरस्य अन्यैः अङ्गैः, संयुतोऽपि = संयुक्तोऽपि, चक्षुषाङ्गेन = नेत्र इत्यङ्ग विशेषेन, हीनः = रहितः, न = नैव, किञ्चित् = किमपि कार्यम्, करः = कर्तुं समर्थः। (भवति)।

व्याख्या

वेदस्य चक्षुर्भूतस्यास्य ज्योतिषशास्त्रस्य महत्त्वं निरूपयात्याचार्यभास्करः यत् इदं ज्योतिषशास्त्रं वेदस्य नेत्ररूपम् इति मुनिभिः कथितम्। तथा च अङ्गेषु चक्षुषोः मुख्यता वर्तते। तेनैव उच्यते यत् अन्यैः कर्णनासादिभिः अङ्गैः युक्तोऽपि नरः यथा न किञ्चित् कर्तुं समर्थो भवति, तथैव अन्यशास्त्रैः युतो वेदज्ञोऽपि ज्योतिषं विना स्वेष्टयज्ञादिकर्मसम्पादने न सफलो भवति। अतः वेदाङ्गेषु ज्योतिषं श्रेष्ठम् इति।

वेदाङ्गज्योतिषस्य कर्त्रा महर्षिलगधेन ज्योतिषशास्त्रस्य अन्यशास्त्रेण सह तुलनां कृत्वा ज्योतिषस्य श्रेष्ठत्वं निरूपितम् –

यथा शिखा मयूराणां नागानां मणयो यथा।
तद्वद्वेदाङ्गशास्त्राणां ज्योतिषं मूर्ध्नि संस्थितम्॥

पदच्छेदः

यथा / शिखा / मयूराणां / नागानां / मणयो / यथा / तद्वत् / वेदाङ्ग / शास्त्राणां/ज्योतिषं / मूर्ध्नि / संस्थितम्।

अन्वयः

यथा मयूराणां मूर्ध्नि शिखा (शोभते), यथा नागानां (मूर्ध्नि) मणयः (शोभन्ते), तद्वत् वेदाङ्गशास्त्राणां मूर्ध्नि ज्योतिषं (स्थितं सत् शोभते)।

प्रतिपदार्थः

यथा = येन प्रकारेण, मयूराणां = मयूराः पक्षिविशेषास्तेषां, मूर्ध्नि = शिरसि, शिखा = अङ्गविशेषः शोभते, येन = येन प्रकारेण, नागानां = सर्पाणां, मूर्ध्नि = शिरसि,च मणयः = प्रकाशकाः रत्नविशेषाः (शोभते), तद्वत् = तेनैव प्रकारेण, वेदाङ्गशास्त्राणां = पूर्वकथिताः षड् वेदाङ्गाः तेषां मूर्ध्नि = शिरसि, ज्योतिषं = ज्योतिषशास्त्रं, संस्थितं = स्थितं वर्तते।

व्याख्या

शरीरे शीर्षस्थानीयः शिरो वर्तते तथा चायं शिरः शरीरे श्रेष्ठत्वं लभते। तर्हि

वेदपुरुषस्य शिरसि कथम् इदं ज्योतिषशास्त्रं शोभते इति अत्र निरूपयत्याचार्यः यत् –

येन प्रकारेण मयूराणां शिरसि शिखाः शोभन्ते, सर्पाणां शिरसि मणयः शोभन्ते, तेनैव प्रकारेण षड्वेदाङ्गशास्त्रेषु शीर्षस्थानीयमिदं प्रकाशस्वरूपं ज्योतिषशास्त्रं शोभते। इति।

बोधप्रश्नाः

१. ज्योतिषशास्त्रे केषां वर्णनं भवति ?

.....

.....

२. वेदस्य चक्षुः कः ?

.....

.....

३. वेदाङ्गज्योतिषम् केन रचितम् ?

.....

.....

४. ऋग्ज्योतिषे कति कारिकाः ?

.....

.....

५. अथर्वज्योतिषम् केन सम्बन्धितम् ?

.....

.....

१.६ ज्योतिषशास्त्रस्य क्रमिकः विकासः

भवता ज्योतिषशास्त्रस्य परिचयं ज्ञातम्। तत्र ज्योतिषशास्त्रस्य उत्पत्तिकारणं तस्य शास्त्रीयं परिचयं, वेदाङ्गरुपेण ज्योतिषशास्त्रस्थितिः तस्य वैशिष्ट्यञ्च ज्ञातम्।

इदं ज्योतिषशास्त्रम् इदानीं यथा विकसितम् अस्ति तथा प्रारम्भादेव नासीत्। ज्योतिषशास्त्रमपि इतरशास्त्रवत् कालक्रमेण पल्लवितं सत् साम्प्रतिकामवस्थायां दृश्यते।

ज्योतिषशास्त्रस्य विकासक्रममिदम् अनुशीलयितुं विविधकालेषु तस्य स्थितिः ज्ञायते –

१. वैदिककाले ज्योतिषशास्त्रस्य स्थितिः।

२. वेदाङ्गकाले ज्योतिषशास्त्रस्य स्थितिः।

३. सिद्धान्तकाले ज्योतिषशास्त्रस्य स्थितिः।

४. आधुनिककाले ज्योतिषशास्त्रस्य स्थितिः।

१.६.१ वैदिककाले ज्योतिषशास्त्रस्य स्थितिः

वेदमन्त्राणा संकलनं यदा अभवत् तस्य कालस्य नाम वैदिककालः। वेदमन्त्राः कदा रचिताः इति तु नैव निश्चितम् परन्तु अनादिकालादेव महर्षयः समाधिकाले

© राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१४

वेदमन्त्रान् प्रत्यक्षीकुर्वन्तः अत एव कथ्यते "ऋषयो मन्त्रद्रष्टारः" इति। तेषां वेदमन्त्राणां संकलनं शकात् षट्सहस्रपूर्वतः पञ्चदशशतशकपूर्वं (६००० श.पू. - १५०० श.पू.) यावत् अभूत् इति विविधानां विदुषां मतानुरोधेन मन्यते। अतः सः कालः वैदिककालः कथ्यते। ज्योतिषविषयकव्यावहारिकज्ञानं तु अस्मात् वैदिककालात् पूर्वमेव आसीत्। वेदमंत्रेषु अस्य उल्लेखोः वर्तते -

"अग्निः पूर्वेभिः ऋषिभिरीड्यो नूतनैरिह॥

अर्थात् पूर्वेभिः ऋषिभिः अग्निः ईड्यो नूतनै इहः (वर्णितौ)।

अर्थात् पूर्वै ऋषिभिः अग्निसम्बन्धिविवेचनम् उक्तं तन्नूतनैः अपि ज्ञायते।

पुनश्च

सूर्याचन्द्रमसौ धाता यथा पूर्वमकल्पयत् -

अर्थात् यथा पूर्वं सूर्याचन्द्रमसौ धाता रूपेण अकल्पयत् इति।

इत्यादि वचनात् ज्ञायते यत् वैदिककालात् पूर्वमपि ज्योतिषसम्बन्धिज्ञानम् जनैः आसीत्। परन्तु तदानीन्तने काले लेखनकलायाः अभावात् तस्य कालस्य लिपिबद्धसाक्ष्यं न मिलति। वैदिककाले ज्योतिषसम्बन्धिविषयाः अपि वेदसंहितायाम् समायोजिताः। अस्मिन् काले ग्रहनक्षत्रादीनां प्रयोगः यज्ञादिषु प्रवृत्तये शुभाशुभकालज्ञानार्थं भवति स्म।

१.६.२ वेदाङ्गकाले ज्योतिषशास्त्रस्य स्थितिः

ईसवीयसम्वत्सरात् पञ्चदशशतवर्षपूर्वतः पञ्चशतवर्षं (१५००ई.पू. -५००ई.) यावत् अस्य कालस्य मर्यादाऽस्ति। अस्मिन् काले एव वेदस्य षडङ्गानां व्याकरण-ज्योतिषादीनां स्वतन्त्ररूपेण विकासः समभवत्। अतः अस्य कालस्य नाम वेदाङ्गकालेति कथ्यते। अस्मिन् काले ज्योतिषशास्त्रस्य स्वतन्त्रग्रन्थस्य रचना अभवत्। यथा पूर्वं भवता पठितं लगधाचार्येण वेदाङ्गज्योतिषस्य रचना कृता। असौ ग्रन्थः अस्मिन् काले एव तेन अकारि। वेदेषु प्रकीर्णितानां ज्योतिषतत्वानां सुव्यवस्थया सरलतया प्रतिपादनं आचार्येण ग्रन्थेऽस्मिन् कृतम्। यस्मिन् नक्षत्रस्वरूपम् नक्षत्रदेवताः, मास-ऋतु-अयन-सम्वत्सर-युगादीनां, मुहूर्त्तेत्यादीनां विविधविषयाणाम् उपस्थापनं वर्तते। तत एतेषां विषयाणां कालक्रमेण पल्लवनं ज्योतिषशास्त्रीयसिद्धान्तग्रन्थेषु अभूत्।

१.६.३ सिद्धान्तकालः

यथा पूर्वम् अभिहितं यत् वेदाङ्गकाले वेदाङ्गज्योतिषस्य रचना संवृत्ता। यद्यपि कालस्यास्य अयमेव ग्रन्थ उपलभ्यते तथापि कालेऽस्मिन् बहुभिराचार्यैः व्यास - गर्ग - च्यवन - भृग्वादिभिः ज्योतिषशास्त्रीयतत्वानां प्रतिपादनं यत्र - तत्र कृतम् येषामुल्लेखः परवर्तिसिद्धान्तकाले ज्योतिषग्रन्थेषु अभूत्। वैदिककाले वेदाङ्गकाले च वृद्धगर्ग-गर्ग-भृग्वाद्याचार्यैः ग्रह-नक्षत्र-कालसम्बन्धिविषयान् परिशील्य यानि मतानि प्रोक्तानि तानि बहुत्र प्रकीर्णितानि आसन्। तेषु केषाञ्चन उल्लेखः सङ्केतो वा इतरग्रन्थेषु उपलभ्यते किन्तु प्रायः कर्णपरम्परयैव तेषां मतानां विविधकालेषु सङ्क्रमणमभूत्। एतेषां ज्योतिषमतानाम् आधिक्यात् ज्योतिषशास्त्रस्य स्कन्धत्रये विभागः अभवत्। ततः सिद्धान्तकाले सिद्धान्त-संहिता-होरा-इति त्रिषु स्कन्धेषु ज्योतिषशास्त्रस्य विकासः संवृत्तः। अत एव वराहमिहिरः स्वग्रन्थे-बृहत्संहितायाम् एवमकथयत्-

आब्रह्मादिविनिःसृतमालोक्य ग्रन्थविस्तरं क्रमशः ॥ इति।।

ब्रह्मणः विनिःसृताः ये वेदाः तेषां क्रमशः विकासात् ग्रन्थस्य = ज्योतिषशास्त्रस्य विस्तारः अभूत्। एवं विस्तृतस्य ज्योतिषशास्त्रस्य सिद्धान्तकाले अप्रतिमः विकासः सञ्जातः। कालेऽस्मिन् पञ्चाङ्गानां (तिथि - वार - नक्षत्र - योग -करणानाम्)स्पष्टज्ञानार्थं सूक्ष्मगणितम् अस्य कालस्य एवोपलब्धिः। शून्यसम्बन्धिज्ञानस्य प्रचारः तथा भू -भ्रमणसम्बन्धिज्ञानम् अस्य कालस्य एवोपलब्धिः वर्तते। ग्रहाणामवलोकनार्थं वेधप्रक्रियायाः अपि अस्मिनत्रेवकाले प्रचारमभवत्। अस्मिन् काले विविधमौलिकग्रन्थानां रचना जाता। तेषु मौलिकग्रन्थेषु रामदैवज्ञकृतोऽयम् मुहूर्तचिन्तामणिरित्याख्यः ग्रन्थोऽपि अस्य कालस्यैव उपलब्धिः वर्तते।

अस्य कालस्य अन्यप्रमुखाः रचनाः एवं वर्तन्ते -

आर्यभट्टस्य	-	आर्यभटीयम्।
वराहमिहिरस्य	-	लघुजातकम्, बृहज्जातकम्, बृहत्संहिता, विवाह-पटलम्, योगयात्रा, पञ्चसिद्धान्तिका इत्यादि।
भास्कराचार्यस्य	-	सिद्धान्तशिरोमणिः, करणकुतूहलम्।
कमलाकरभट्टस्य	-	सिद्धान्ततत्त्वविवेकः। इत्यादयः।

१.६.४ आधुनिककालः

१६०० ईस्वीतः आरभ्य वर्तमानकालं यावत् आधुनिककालः चलति। आधुनिककाले ज्योतिषशास्त्रस्य विविधक्षेत्रेषु विकासः गोचरीक्रियते। प्राप्ते साम्प्रतिके काले ज्योतिषशास्त्रस्य गणनायै हेतु विविधसङ्गणकोपकरणानि अपि निर्मितानि, वेधकार्याय विभिन्नानि आधुनिकयंत्राण्यपि निर्मितानि सन्ति। ज्योतिषशास्त्रस्य न केवलं सिद्धान्तस्कन्धे विकासः जातः अपितु मानवोपरि ग्रहाणां फलज्ञानार्थं विविधाः जातकग्रन्थाः अपि विरचिताः वर्तन्ते। पञ्चाङ्गस्य महत्त्वमपि पदे-पदे दृश्यते। सामुद्रिकविज्ञानम्, हस्तरेखाविज्ञानम्, वास्तुविज्ञानम्, भूकम्पविज्ञानम्, वर्षाविज्ञानम् इत्यादि बहव्यः शाखाः प्रस्फुटिताः सन्ति। यद्यपि एते विषयाः पूर्वमप्यासन् परन्तु स्वतन्त्रविज्ञानरूपेण एतेषां विकासः प्रचारश्च अस्य कालस्य एवोपलब्धिरस्ति। आधुनिककालस्य महत्त्वपूर्णाः विद्वांसः नीलाम्बरझा, बापूदेवशास्त्री, वेङ्कटेशकेतकरः, पं.सुधाकरद्विवेदी, शंकरबालकृष्णदीक्षितः, केशवः, गणेशदैवज्ञः, रामचन्द्रदैवज्ञः इत्यादयः सन्ति।

१.७ ज्योतिषशास्त्रस्य प्रमुखाः आचार्याः

इदानीं ज्योतिषशास्त्रस्य विविधाङ्गाधिकृत्य बहवः पण्डिता आचार्याः विविधसिद्धान्तान् प्रतिपादितवन्तः वर्तमानसमयेऽपि तदर्थं सन्नद्धाः सन्ति। परन्तु तेषामाधारभूतः अस्माकं ज्योतिषशास्त्रस्य अष्टादशप्रवर्तकाचार्याः एव सन्ति। पूर्वं भवता अधीतं यत् वैदिककाले वेदाङ्गकाले च बहवः आचार्याः ज्योतिषशास्त्रमर्मज्ञा आसन् येषां मतैः ज्योतिषशास्त्रम् पुष्पितमभवत्। एते अष्टादश आचार्याः ज्योतिषशास्त्रप्रवर्तकरूपेण स्वीकृताः। ते क्रमशः एवं सन्ति -

१.	सूर्यः	२.	पितामहः	३.	व्यासः	४.	वशिष्ठः		
५.	अत्रिः	६.	पराशरः	७.	कश्यपः	८.	नारदः		
९.	गर्गः	१०.	मरीचिः	११.	मनुः	१२.	अंगिरा		
१३.	लोमशः	१४.	पौलिशः	१५.	च्यवनः	१६.	यवनः		
१७.	भृगुः	१८.	शौनकश्च इति।						

© राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१४

उक्तञ्च –

सूर्यः पितामहो व्यासः वशिष्ठोऽत्रिपराशरः।
कश्यपो नारदो गर्गो मरीचिर्मनुरङ्गिरा॥

लोमशः पौलिशश्चैव च्यवनो यवनो भृगुः।
शौनकोऽष्टादशश्चैव ज्योतिःशास्त्रप्रवर्तकाः॥

एतेषु आचार्येषु सूर्यः पितामहः वशिष्ठः लोमशः (रोमकः), पौलिशश्च एते आचार्याः ज्योतिषस्य गणितीयसिद्धान्तानाम् प्रवर्तकाः आसन्। सिद्धान्तकाले (पूर्वमध्यकाले) एतैः रचित सिद्धान्तग्रन्थानाम् नामानि क्रमशः सौरसिद्धान्तः पैतामहसिद्धान्तः (ब्राह्मसिद्धान्तो वा) वासिष्ठसिद्धान्तः रोमकसिद्धान्तः, पौलिशसिद्धान्तः इति सन्ति। एतेषां पञ्चसिद्धान्तानां सङ्कलनं सम्पादनञ्च वराहमिहिराचार्येण स्वग्रन्थे कृतम्।

"पौलिशरोमकवासिष्ठसौरपैतामहास्तु पञ्चसिद्धान्ताः॥" इति

अन्येषां व्यासप्रभृत्याचार्याणां मतानि प्रायः जातक-संहितेति द्वयोः स्कन्धयोः अन्तर्निहितानि सन्ति।

बोधप्रश्नाः

६. ज्योतिषशास्त्रप्रवर्तकाः आचार्याः कति?

.....
.....

७. सौरादिपञ्चसिद्धान्तानां सङ्कलनं वराहमिहिरः कस्मिन् ग्रन्थे कृतवान्?

.....
.....

८. सिद्धान्तशिरोमणिः कस्य रचना अस्ति?

.....
.....

१.८ सारांशः

अयं प्रथमः पाठः ज्योतिषशास्त्रस्य जिज्ञासूनां कृते आधारभूतः अस्ति। अस्मिन् पाठे ज्योतिषशास्त्रस्य उत्पत्ति-विकासः, ज्योतिषशास्त्रस्य वेदाङ्गत्वनिरूपणम् इत्यादिविषयाः निरूपिताः सन्ति।

अस्य पाठस्य तृतीये पाठ्यांशे ज्योतिषशास्त्रस्योत्पत्तिः ज्योतिषशास्त्रस्य विवेच्यविषयास्तत्र ग्रह-नक्षत्राणां परिचयः तेषां परिभाषा, तदधिकृत्य ज्योतिषशास्त्रस्य परिभाषाविषये निरूपणम् अस्ति।

चतुर्थे पाठ्यांशे वेदाङ्गज्योतिषस्य वर्णनम् अस्ति। तत्र वेदाङ्गानां परिचयः, वेदाङ्गेषु ज्योतिषस्य स्थानम्, ज्योतिषशास्त्रस्य चक्षुषाङ्गे वर्णनम्, लगधप्रणीतस्य वेदाङ्गज्योतिषस्य वर्णनमस्ति।

पञ्चमे पाठ्यांशे ज्योतिषशास्त्रस्य क्रमिकः विकासस्तत्र वैदिककालादारभ्य आधुनिककालपर्यन्तं विविधकालेषु ज्योतिषशास्त्रस्य स्थितिः वर्णिता।

१.९ शब्दावली

१.	ज्योतींषि	=	येषु ज्योतिः अस्ति।
२.	ज्योतिः	=	प्रकाशः।
३.	दैवज्ञः	=	यः दैवं (भविष्यं) जानाति।
४.	कालानुपूर्वा	=	शुभाशुभकालाधारिता।
५.	वेदाङ्गम्	=	वेदस्य अङ्गम्।
६.	चक्षुः	=	नेत्रम्।
७.	प्रत्यक्षं	=	नेत्राभ्यां दर्शनयोग्यम्।
८.	कालः	=	समयः।
९.	रौद्रः	=	क्रूरः।
१०.	जिज्ञासा	=	ज्ञानस्य इच्छा।

१.१० सन्दर्भग्रन्थः

१. मुहूर्तचिन्तामणिः, चौखम्भासंस्कृतसंस्थानम्, वाराणसी।

१.११ सहायकग्रन्थाः

१. ज्योतिषशास्त्रस्येतिहासः, लोकमणि दाहालः

२. बृहत्पाराशरहोराशास्त्रम्।

३. सिद्धान्तशिरोमणिः।

१.१२ बोधप्रश्नोत्तराणि

१. ग्रह-नक्षत्रादीनां (ज्योतिष्पिण्डानां) वर्णनम् अस्ति।

२. वेदस्य चक्षुः ज्योतिषम् अस्ति।

३. महात्मना लगधेन रचितम्।

४. ऋग्ज्योतिषे षट्त्रिंशत् (३६) कारिकाः सन्ति।

५. अथर्वज्योतिषम् फलितज्योतिषेन सम्बन्धितम्।

६. अष्टादश।

७. पञ्चसिद्धान्तिकायाम्।

८. भास्कराचार्यस्य।

© राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१४

१.१३ अभ्यासप्रश्नाः

१. नक्षत्राणां नामानि लिखत।

२. ज्योतिषशास्त्रस्य परिभाषा देया।

३. ज्योतिषशास्त्रस्य काल विभाजनं क्रियताम्।

४. ज्योतिष शास्त्रस्य प्रवर्तकाचार्याणां नामानि लिखत।

—•—

द्वितीयः पाठः (त्रिस्कन्धविवेचनम्)

पाठसंरचना

२.१ प्रस्तावना
२.२ उद्देश्यम्
२.३ ज्योतिषशास्त्रस्य स्कन्धाः
२.३.१ त्रिस्कन्धज्योतिषम्
२.३.२ पञ्चस्कन्धात्मकं ज्योतिषम्
२.४ ज्योतिषशास्त्रस्य सिद्धान्तस्कन्धः
२.४.१ सिद्धान्तम्
२.४.२ ज्योतिषस्य सिद्धान्ताः
२.४.३ पञ्चसिद्धान्ताः
२.४.४ सिद्धान्तस्कन्धस्य आवश्यकता
बोधप्रश्नाः
२.५ होरास्कन्धः
२.५.१ होराशब्दव्युत्पत्तिः
२.५.२ राश्यर्द्धभोगकालः होरा
२.५.३ होराशास्त्रम्
२.५.४ होराशास्त्रस्य विषयाः
२.५.५ होरास्कन्धस्य आवश्यकता
२.६ संहितास्कन्धः
२.६.१ संहितास्कन्धस्य विषयाः
२.६.२ महर्षिनारदोक्ताः संहितास्कन्धस्य विषयाः
२.६.३ संहितास्कन्धस्य आवश्यकता
बोधप्रश्नाः
२.७ पञ्चस्कन्धेषु प्रश्नस्कन्धः
२.७.१ प्रश्नस्कन्धस्य विषयाः
२.८ शकुनस्कन्धः
२.८.१ शकुनम्
२.८.२ शकुनस्कन्धस्य विषयाः
२.९ ज्योतिषशास्त्रस्य स्कन्धेषु मुहूर्त्तस्य स्थानम्
ग्रन्थकर्त्तुः परिचयः
बोधप्रश्नाः
२.१० सारांशः
२.११ शब्दावली
२.१२ सन्दर्भग्रन्थाः
२.१३ सहायकग्रन्थाः
२.१४ बोधप्रश्नोत्तराणि
२.१५ अभ्यासप्रश्नाः

२.१ प्रस्तावना

प्रथमे पाठे भवता ज्योतिषशास्त्रस्य सामान्यः परिचयः पठितः। तस्मिन् पाठे ज्योतिषशास्त्रस्य उत्पत्तिः तस्य परिभाषा, ज्योतिषशास्त्रस्य अन्यशास्त्रेण सह तुलना, वेदाङ्गेषु ज्योतिषशास्त्रस्य

© राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१४

स्थानम्, ज्योतिषशास्त्रस्य आचार्याः, ज्योतिषशास्त्रस्य विविधकालेषु स्थितिः इत्यादिविषयाः पठिताः।

अस्मिन् द्वितीये पाठे ज्योतिषशास्त्रस्य प्रमुखविभागान् पठिष्यन्ति। ज्योतिषशास्त्रस्य मुख्यतया त्रयः स्कन्धाः वर्तन्ते। तेषु स्कन्धेषु अखिलाः ज्योतिषविषयाः निरूपिताः। तत्र प्रत्येकेऽस्मिन् स्कन्धे के-के विषयाः वर्णिताः सन्ति ? मुहूर्त्तसम्बन्धिज्ञानम् ज्योतिषशास्त्रस्य कस्मिन् स्कन्धे वर्तते? इत्यस्यापि विवेचनमस्ति।

कालान्तरेण विद्वद्भिः अस्य ज्योतिषशास्त्रस्य पञ्चस्कन्धेष्वपि विभागः कृतः। होरास्कन्धात् एकः "प्रश्न" इत्याख्यः स्वतन्त्रस्कन्धः तथा संहितास्कन्धात् "शकुन" इत्याख्यः स्वतन्त्रस्कन्धः निर्मितः। अत आहत्य पञ्चस्कन्धात्मकमिदं ज्योतिषशास्त्रम् अभूत् यस्य कालान्तरे इतोऽपि विभागाः निर्मिताः। पाठेऽस्मिन् भवान् एतेषां पञ्चस्कन्धानां विस्तरेण परिचयं प्राप्स्यति।

२.२ उद्देश्यम्

- ज्योतिषशास्त्रस्य स्कन्धानां वर्णनं कर्तुं शक्ष्यति।
- पञ्चस्कन्धेषु ज्योतिषशास्त्रस्य स्वरूपं निरूपयितुं शक्ष्यति।
- ज्योतिषशास्त्रीयस्कन्धेषु मुहूर्त्तशास्त्रस्य स्थानं ज्ञातुं शक्ष्यति।
- विविधस्कन्धानां ग्रन्थान् प्रमुखाचार्यांश्च वक्तुं पारयिष्यति।

२.३ ज्योतिषशास्त्रस्य स्कन्धाः

पूर्वं ज्योतिषशास्त्रस्य क्रमिकविकासः पठितः। तत्र सिद्धान्तकालस्य अवधारणा पठिता। ज्योतिषशास्त्रस्य विषयविस्तारं दृष्ट्वा कार्यविशेषे उपयोगार्थं त्रिषुस्कन्धेषु विभाजनम् कालेऽस्मिन् अभवत्। अस्मात् कालात् इदं ज्योतिषशास्त्रं स्कन्धत्रयात्मकम् इति नाम्नाख्यातम्।

केचन् ज्योतिर्विदः इदानीं ज्योतिषशास्त्रस्य पञ्च स्कन्धाः मन्यन्ते। तेषामनुसारं प्रश्नस्कन्धः तथा शकुनस्कन्धः एतौ द्वौ स्कन्धौ सिद्धान्त-संहिता-होरा इत्याख्यात् स्कन्ध त्रयादतिरिक्तः वर्तते। ततः कालक्रमेण ज्योतिषशास्त्रस्य अतिविस्तरात् ताजिक-सामुद्रिक-वास्तु-स्वरभेदेन नव स्कन्धा अभूवनत्। सम्प्रति तु अस्य ज्योतिषशास्त्रस्य अन्या अपि बहव्यः शाखाः प्रशाखाः अङ्क-स्वप्न-फेंगशुई-टैराकार्डप्रभृतय उद्भूताः दृश्यन्ते।

२.३.१ त्रिस्कन्धज्योतिषम्

यथा भवता अधीतं चक्षूरूपस्य ज्योतिषशास्त्रस्य त्रयः स्कन्धाः प्राचीनकालात् महर्षिभिः निरूपिताः वर्तन्ते। ते प्रसिद्धाः -

१. सिद्धान्तस्कन्धः

२. होरास्कन्धः

३. संहितास्कन्धः

महर्षिनारदेनापि लिखितम् नारदसंहितायाम् -

सिद्धान्त-संहिता-होरारूपं स्कन्धत्रयात्मकम्।
वेदस्य निर्मलं चक्षुः ज्योतिःशास्त्रमकल्मषम्॥

पदच्छेदः

सिद्धान्त/संहिता/होरा/रूपं/स्कन्ध/त्रयात्मकं/वेदस्य/निर्मलं/चक्षुः/ ज्योतिःशास्त्रम् / अकल्मषम्।

अन्वय

वेदस्य निर्मलं चक्षुः (इदं) अकल्मषं ज्योतिषशास्त्रं सिद्धान्त-संहिता-होरा रूपं स्कन्धत्रयात्मकं वर्तते।

प्रतिपदार्थः

वेदस्य = वेदप्रभोः, निर्मलं = पवित्रं, चक्षुः = नेत्रं (इदं) अकल्मषं = दोषरहितं, ज्योतिषशास्त्रम् = प्रस्तुतं ज्योतिषशास्त्रं, सिद्धान्त = सिद्धान्तस्कन्धेन, संहिता = संहितास्कन्धेन, होरा = होरास्कन्धेन, रूपं = इत्येवं रूपेण, स्कन्धत्रयात्मकं = त्रिस्कन्धयुतं, वर्तते = अस्ति।

व्याख्या

वेदप्रभोः षडङ्गेषु निर्मलं चक्षुरूपमिदं सर्वथा शङ्कादिदोषहीनं ज्योतिषशास्त्रम् सिद्धान्त-संहिता-होरा इति रूपेण त्रिस्कन्धात्मकं वर्तते।

२.३.२ पञ्चस्कन्धात्मकं ज्योतिषम्

भवता पठितम् यत् पुरा ज्योतिषशास्त्रस्य त्रयः स्कन्धाः आसन्। परन्तु कालान्तरेण प्रश्नशास्त्रस्य तथा शकुनशास्त्रस्य एतयोः द्वयोः विषययोः प्रयोगबहुलतां दृष्ट्वा विद्वद्भिः एतयोः भिन्नस्कन्धरूपेण गणना कृता। अत इदानीमस्य ज्योतिषशास्त्रस्य पञ्चस्कन्धाः निर्मिताः वर्तन्ते -

१. सिद्धान्तः

२. संहिता

३. होरा

४. प्रश्नः

५. शकुनम्

उक्तं हि -

पञ्चस्कन्धमिदं शास्त्रं होरा-गणित-संहिता।
कैरलिः शकुनश्चैव .....इति ॥

अत्र कैरलिः इत्यनेन केरलप्रदेशे प्रवर्तिताः प्रसिद्धः प्रश्न इति नामकः स्कन्धः ज्ञातव्यः। केरलप्रान्ते प्रश्नस्कन्धस्य प्रयोगबाहुल्यं दृश्यते।

२.४ ज्योतिषशास्त्रस्य सिद्धान्तस्कन्धः

भवता पूर्वमेव पठितं यत् ज्योतिषशास्त्रस्य मध्यकालिक इतिहासः सिद्धान्तकाल नाम्ना प्रसिद्धम्। यतो हि कालेऽस्मिन् ज्योतिषशास्त्रस्य प्रमुखसिद्धान्तनामविर्भावोऽभवत्। एतेषां सिद्धान्तानां यस्मिन् स्कन्धे एकत्रीकरणम् अस्ति तस्य स्कन्धस्य नाम सिद्धान्तस्कन्धः इति

© राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१४

ज्ञायते। अतः सिद्धान्तस्कन्धविषये ज्ञानात् पूर्वं "सिद्धान्त" इत्यस्य शब्दस्य ज्ञानम् आवश्यकम् अतः तद् विषये चर्चा क्रियतेऽत्र -

२.४.१ सिद्धान्तम्

सामान्यतया "सिद्धः अन्तः यस्य सः सिद्धान्तः" इति। वैज्ञानिकैः विविध विषयकाः अनेके सिद्धान्ताः प्रतिपादिताः। यथा भवता श्रुतं भास्कराचार्यस्य आकर्षणविषयकः सिद्धान्तः, आर्यभट्टमहोदयस्य भूभ्रमणसिद्धान्तः इत्यादि। तैः वैज्ञानिकैः या परिकल्पना उपस्थापिता तस्य विविधतर्क-परीक्षण-प्रयोगेत्यादिना सैव परिकल्पना निष्कर्षरूपेण प्रमाणिता भवति चेत् सा परिकल्पना सिद्धान्तरूपेण निगद्यते।

अतः सिद्धान्तशब्दः एवं परिभाशितुं शक्यते -

"निरीक्षण- परीक्षण-निष्कर्षादिभिः यन्मतं मुखरितं (उत्पन्नं) भवति तस्यैव सिद्धान्त" इति संज्ञा।

२.४.२ ज्योतिषस्य सिद्धान्ताः

यथा भवता पूर्वं पठितं यत् ज्योतिषं ग्रह-नक्षत्रादीनां गति-स्थिति-प्रभावादिकं प्रतिपादयति। तत्र ग्रहाणां गति-स्थित्योः ज्ञानं गणित-खगोलज्ञानबलादेव भवति। एतदर्थं गणितगोलयोः ज्ञानमावश्यकं। एतद् गणितं खगोलज्ञानञ्च सिद्धान्तस्कन्धे अन्तर्भूतमस्ति। तथा हि -

त्रुट्यादिप्रलयान्तकालकलना मानप्रभेदः क्रमात्
चारश्च द्युसदां द्विधा च गणितं प्रश्नास्तथासोत्तराः।
भूधिष्ण्यग्रहसंस्थितेश्च कथनं यन्त्रादि यत्रोच्यते।
सिद्धान्तः स उदाहृतोऽत्र गणित -स्कन्धप्रबन्धे बुधैः॥

पदच्छेदः

त्रुट्यादि / प्रलयान्तकाल / कलना / मानप्रभेदः / क्रमात् / चारः / च / द्युसदां / द्विध /च /गणितं / प्रश्नाः / तथा / सोत्तराः / भू / धिष्ण्य / ग्रह / संस्थितेः / च / कथनं / यन्त्रादि / यत्र / उच्यते / सिद्धान्तः / सः / उदाहृतः / अत्र / गणितस्कन्ध / प्रबन्धे / बुधैः।

अन्वयः

त्रुट्यादिप्रलयान्तकालकलना क्रमात् मानप्रभेदश्च द्युसदां चारश्च द्विधा गणितं च, सोत्तराः (विविधाः) प्रश्नाः भू-धिष्ण्य-ग्रहसंस्थितेः कथनं च यन्त्रादिः यत्रोच्यते स सिद्धान्तः (इत्यत्र) बुधैः गणितस्कन्धप्रबन्धे इति उदाहृतः।

प्रतिपदार्थः

त्रुट्यादिप्रलयान्तकालः = त्रुटि-रेणु-लव-लीक्षक-प्राणप्रभृति सूक्ष्मकालमानतः सृष्टिप्रलयकालं यावत् कालः, कलना = गणना, क्रमात् = क्रमशः, मानप्रभेदः = सौर-चान्द्र-सावन-पैत्र्य-नाक्षत्र-गौरव-दिव्य-ह्ने प्राजापत्य-ब्रह्मेति नव कालभेदाः, च = अपि , द्युसदां चारश्च = ग्रहाणां राशिचारश्च, द्विधगणितं = व्यक्तगणितम् अव्यक्तगणितञ्चेति द्विधा, सोत्तराः प्रश्नाः = शङ्कासमाधानरूपं (खण्डन-मण्डनरूपं सोपपत्तिकम्) भूधिष्ण्यग्रसंस्थितेः = भू-नक्षत्र-ग्रहाणां या स्थितिः तस्य कथनं = वर्णनम्, च = अपि, यन्त्रादिः = शंकु - यष्टि - तुरीय - गोलेत्यादि यन्त्रैः (तेषां वर्णनं) यत्रोच्यते = यत्र विविच्यते, गणितस्कन्धप्रबन्धे = गणितश्चासौ स्कन्धः अर्थात् गतिरूपस्कन्धः तस्य प्रबन्धः ग्रन्थः यः सिद्धा सूर्यसिद्धान्त-

सिद्धान्तशिरोमणिप्रभृतिष्वन्यतमः तस्मिन् अर्थात् सूर्यसिद्धान्ते, सिद्धान्तशिरोमणौ इत्यादिषु उपर्युक्तविषयाः , सिद्धान्तः = सिद्धान्त स्कन्धसम्बद्धाः बुधैः = विद्वद्भिः, उदाहृतः = कथिताः।

व्याख्या

भास्कराचार्यः सिद्धान्तस्कन्धस्य विषयान् निरूपयति यत् अस्मिन् स्कन्धे त्रुट्यादिसूक्ष्मकालमानतः प्रलयकालं यावत् कालस्य गणना क्रियते, सौर-चान्द्रादि नवविधानां कालमानानां वर्णनमस्ति ग्रहचारसम्बन्धि गणनायां द्विविधं व्यक्ताव्यक्तगणितं वर्ण्यते, विविध खगोलविषयकशङ्कासमाधानं निरूप्यते, भू-नक्षत्र- नभोवर्तिग्रहाणां स्थितिज्ञानम् तथा शङ्कु-यष्ट्यादीनां यन्त्राणां वर्णनम् अपि अत्र क्रियते। अस्य स्कन्धस्य गणितस्कन्ध नाम्नाऽपि बुधैः व्यवहारः क्रियते।

२.४.३ पञ्चसिद्धान्ताः

वर्तमानकाले ज्योतिषशास्त्रस्य विविधविषयेषु विभिन्नाः सिद्धान्ताः प्रतिपादिताः दृश्यन्ते। अनेकैः विद्वद्भिः ग्रहगणित-विषयक-सिद्धान्ताः रचिताः। परन्तु तेषामाधारभूताः सौरादिसिद्धान्ताः एव। प्रख्यातज्योतिर्विद् आचार्यवाराहमिहिरः पञ्चसिद्धान्तिकायां कृतवान् अस्ति -

"पौलिशरोमकवाशिष्ठसौरपैतामहास्तु पञ्च सिद्धान्ताः"

एतेषां पञ्चसिद्धान्तानां विषये वर्णनं मिलति यत् -

पितामहो ब्रह्मा वेदेषु निहितं ज्योतिषविषयकरहस्यं वशिष्ठाय प्रोक्तवान् पितामहमुखात् निर्गतत्वात् सः पैतामहः सिद्धान्तः। अयमेव नितान्तप्राचीनः सिद्धान्तः वर्तते।

सूर्यः मयासुराय यत् कालविषयकज्ञानं प्रादात् तस्यैव सौरसिद्धान्त इति संज्ञा। ब्रह्मणोपदिष्टं सिद्धान्तं महर्षिवशिष्ठः स्वबुद्धया विविच्य पराशरायोपदिष्टवान् अयम् वशिष्ठेनोक्तत्वात् वाशिष्ठसिद्धान्तः।

वशिष्ठात् ज्ञानं प्राप्य महर्षिपराशरः गर्गादिमुनिभ्यः यमुपदिष्टवान् सः पौलिश सिद्धान्तः इति लोकश्रुतिः। कदाचित् अस्य सिद्धान्तस्य प्रवर्तनं यवनदेशे केनचित् यवनेन कृतम् इत्यपि आमनन्ति विद्वांसः।

ब्रह्मणः शापाज्जातेन सूर्येण यवनजातिषु रोमक नगरे उपदिष्ठवान् तस्मात् रोमकनगरे प्रचलितः अयं रोमक सिद्धान्तः ख्यातः।

प्रोक्तेषु पञ्चसिद्धान्तेषु सौरसिद्धान्तः सर्वोत्कृष्टः वर्तते। वराहमिहिरः वदति -

पौलिशकृतः स्फुटोऽसौ तस्यासन्नस्तु रोमकः प्रोक्तः।
स्पष्टतरं सावित्रः परिशेषौ दूरविभ्रष्टौ॥

अर्थात् पौलिशसिद्धान्तः (पराशरप्रोक्तः) स्पष्टः अस्ति। रोमकसिद्धान्तः स्पष्टसमीपः (किञ्चित् स्पष्टः), सौर (सावित्र)- सिद्धान्तः पूर्णस्पष्टः तथा अपरौ द्वौ अस्पष्टौ अशुद्धौ स्तः।

अस्यैव सिद्धान्तस्कन्धस्य त्रयः भेदाः सञ्जाताः। ते क्रमशः एवं सन्ति -

१. सिद्धान्तः २. तन्त्रम्

३. करणम्

© राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१४

१. **सिद्धान्तः**– सिद्धान्तस्कन्धस्य सा शाखा यत्र सृष्ट्यारम्भकालात् वर्तमानकालं यावत् कालगणनाकृत्वा ग्रहस्पष्टीकरणादिगणितं विधीयते तस्य 'सिद्धान्त' इति संज्ञा। अत्र सृष्ट्यारम्भकालादहर्गणम् निर्माय गणना क्रियते। प्रमुखाः सिद्धान्तग्रन्थाः क्रमशः सूर्यसिद्धान्तः, सिद्धान्तशिरोमणिः, ब्राह्मस्फुटसिद्धान्तः, आर्यभट्टीयम् इत्यादि सन्ति।

२. **तन्त्रम्**– सिद्धान्तस्कन्धस्य यस्यां पद्धत्यां युगादिकालादारभ्य कालगणना क्रियते तत् तन्त्रमस्ति। अस्मिन् भागे युगादौ अभीष्टग्रहाणां राश्यादिस्थितिं विगणय्य प्रत्येकं ग्रहस्य राश्यादिः ध्रुवाङ्कः निर्धार्यते। तदाधारीकृत्य गणनया वर्तमानकालिक-ग्रहस्थितिः ज्ञायते। अस्य सम्बन्धितो ग्रन्थः शिष्यधीवृद्धिदं लल्लाचार्यस्य वर्तते।

३. **करणम्**– अस्याम् पद्धतौ अभीष्टशकादेः कालगणनां विधाय ग्रहाणां ध्रुव- क्षेपाङ्कादिसाहाय्येन ग्रहसाधनादिगणितं विधीयते। ग्रहलाघवम्, केतकीग्रहगणितम्, सर्वानन्दकरणम् इति प्रसिद्धाः करणग्रन्थाः सन्ति।

२.४.४ सिद्धान्तस्कन्धस्य आवश्यकता

समुचितसिद्धान्तमाध्यमेन स्पष्टगणितप्रक्रियया च ग्रह-नक्षत्रादीनां राश्यादिस्थितिज्ञानं ततः तस्मिन् राश्यादौ वेधेन तेषां दर्शनं कर्तुं शक्यते। स्पष्टग्रहादीनां दृग्गणितैक्ये सति नित्यनैमित्तिककार्याणां सम्पादने शुभाशुभकलनिर्धारणं भवितुमर्हति। अतः गणित-गोलविशिष्टस्य सिद्धान्तस्य ज्ञानं विना शुभाशुभकालज्ञानाभावः, कालानुरुपव्रतपर्वादिप्रवृत्तौ विप्रतिपत्तिश्च जायेत् अतः सिद्धान्तस्कन्धस्य महती आवश्यकता अस्ति।

आचार्यवराहमिहिरः वदति यत यः दैवज्ञः सिद्धान्तस्कन्धे प्रवीणः तथा सिद्धान्तस्कन्धस्य विषयेषु छाया-अम्बुयन्त्रादीनां विषये सम्यक् जानाति तदा तेन प्रोक्तम् भविष्यविवेचनम् असत्यं न भवति।

उक्तं हि तेन –

तन्त्रे सुपरिज्ञाते लग्ने छायाम्बुयंत्रसंविदिते।
होरार्थे च सुरुढे नादेष्टुर्भारती वन्ध्या॥

पदच्छेदः

तन्त्रे/ सुपरिज्ञाते/ लग्ने/ छाया/ अम्बु/ यन्त्र/ संविदिते/ होरार्थे/ च/ सुरूढे/ न/ आदेष्टुः/भारती/वन्ध्या।

अन्वयः

तन्त्रे सुपरिज्ञाते लग्ने छाया-अम्बु-यन्त्रसंविदिते होरार्थे च सुरूढे (तस्य) आदेष्टुः भारती वन्ध्या न भवति।

प्रतिपदार्थः

तन्त्रे = सिद्धान्तस्कन्धे, सुपरिज्ञाते = सम्यक्ज्ञानयुते, लग्ने = लग्नज्ञाने, छाया = छायाज्ञाने, अम्बु = अम्बुयन्त्रे, संविदिते = सम्यग्ज्ञाते, होरार्थे = होरासम्बन्धि फलज्ञाने, सुरूढे = नियुक्ते (तस्य) आदेष्टुः = फलादेशकस्य दैवज्ञस्य, भारती = वाणी, वन्ध्या = विफलं, न = नैव, (भवति)।

व्याख्या

यः फलादेशकर्त्ता दैवज्ञः स यदि सिद्धान्तस्कन्धे प्रवीणः तथा च छायायंत्र-

जलयंत्रादियन्त्राणां सम्यक् ज्ञाता अस्ति स दैवज्ञः यदि फलादेशं करोति तदा तस्य वाणी मिथ्या न भवति।

बोधप्रश्नाः

१. ज्योतिषशास्त्रस्य कति स्कन्धाः प्रसिद्धाः?

.....

.....

२. त्रुट्यादिकालगणना कस्मिन् स्कन्धे क्रियते?

.....

.....

३. के पञ्चसिद्धान्ताः?

.....

.....

४. सिद्धान्तस्कन्धस्य के भेदाः?

.....

.....

५. ग्रहलाघवं सिद्धान्तग्रन्थः करणग्रन्थो वा ?

.....

.....

६. तन्त्रे अभीष्टशकात् कालगणना क्रियते सत्यं मिथ्या वा?

.....

.....

२.५ होरास्कन्धः

२.५.१ होराशब्दव्युत्पत्तिः

ज्योतिषशास्त्रस्य यस्मिन् स्कन्धे नक्षत्रेषु राशिषु वा ग्रहाणां स्थितिवशात् मनुष्यस्य सुख दुःखादीनां ज्ञानं भवति सः होरा स्कन्धः कथ्यते।

अहोरात्र = अ + हो + रा + त्र = होरा

"अहोरात्र शब्दः अहन् च रात्रिश्च" इत्यस्य समासरूपः अस्ति।

आचार्यवराहमिहिरः वदति -

"होरेत्यहोरात्र विकल्पमेके वाञ्छन्ति पूर्वापरवर्णलोपात्" इति।

यतो हि अहोरात्रः दिवसरात्रयोः पर्यायशब्दः अस्ति अतः अहोरात्रशब्दान्निष्पन्नः होरा शब्दः अपि दिनरात्रिभागस्य खण्डमानं भवति।

एकस्मिन्नहोरात्रे चतुर्विंशति (२४) होराः भवन्ति।

© राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१४

१ अहोरात्र = २४ होरा।

वर्तमान काले यत् हॉवर (hour) इति शब्दः आंग्लभाषायां प्रचलितोऽस्ति तत् 'होरा' इत्यस्येव पाश्चात्यवर्ति विकृतरूपः।

१ अहोरात्र = २४ होरा = (24 hour)

२.५.२ राश्यर्द्धभोगकालः होरा

एकस्मिन्नहोरात्रे राशिचक्रस्थाः द्वादशराशयः एकं भगणपूर्णं पूरयन्ति।

अतः -

यद्येकस्मिन् अहोरात्रे (२४ होरायां) द्वादशराशयः भ्रमन्ति।

तदा

$\because$ 24 होरायां = 12 राशयः

$\therefore$ 1 होरायां = $\frac{12}{24}$ राशयः = $\frac{1}{2}$ राशयः

$\frac{1}{2}$ राशय = 1 होराकालः

अतः राश्यर्द्धभोगकालः होरा कथ्यते। तदा एकस्मिन् राशौ होराद्वयम् भवति।

२.५.३ होराशास्त्रम्

भट्टोत्पलेन कथ्यते -

एकस्मिन्नेवाहोरात्रे द्वादराशिचक्रस्य एकं भ्रमणं जायते। भ्रमणात् प्रत्येकं राशेः उदयः क्षितिजे भवति। क्षितिजे राशेरुदयमेव तल्लग्नमित्यभिधीयते। इत्थं जन्मकाले यः राशिः क्षितिजं स्पृशति तं राशिं लग्नं मत्वा जन्मकुण्डल्यां प्रथमे भावे तस्य राशेः अङ्कनं ततः अन्येषां क्रमशः द्वितीयादिभावेषु स्थापनं क्रियते। इत्थमेकस्मिन्नहोरात्रे भ्रमणात् सम्पूर्णानां द्वादशराशीनां क्षितिजसन्निधिवशात् विविधानि मेषादिलग्नानि निर्धार्य ततः तदनुसृत्य जन्माङ्गचक्रनिर्माणं शुभाशुभफलादेशश्च क्रियते। अतः अहोरात्राश्रयत्वात् शुभाशुभफलज्ञानविषयकं होरास्कन्धमिदम्।

२.५.४ होराशास्त्रस्य विषयाः

होराशास्त्रस्य प्रमुखविषयः ग्रहनक्षत्रादीनां स्थितिवशात् मनुष्यस्य सुख-दुःखदीनां ज्ञानमस्ति। अयं तु पूर्वमेव पठितम्।

अतः शुभाशुभज्ञानस्वरूपाः विषया एव होरास्कन्धे संकलिता। यथा - राशीनां स्वरूपज्ञानम्, ग्रहाणां स्वरूपज्ञानम्, आधानविषयक ज्ञानम्, राशिजातफलम्, नक्षत्रजातफलम्, मूलादिनक्षत्रेषूत्पन्नस्य जातकफलम्, जातकस्य कुण्डल्यां ग्रहस्थितिफलम्, ग्रहदृष्टिफलम्, अरिष्टज्ञानम्, आयुर्ज्ञानम्, विविधाः नाभसयोगाः, राजयोगाः, केमद्रुमयोगाः, जातकस्य आजीविकादिविचारः, जातकस्य दशाऽन्तर्दशादिचिन्तनम् तद्वशात् शुभाशुभफलप्राप्तिकालस्य

निर्धारणम् यश-अपयश-दुर्घटना-लाभेत्यादिविषयाणां पूर्वज्ञानम्, गोचरफलनिर्धारणार्थम् अष्टकवर्गादि विषयाणां वर्णनं होरा स्कन्धे वर्तते।

कालान्तरेण होराशास्त्रस्य विषय-विस्तारं दृष्ट्वा ज्योतिर्विद्भिः अस्य त्रयः विभागाः कृताः -

१. जातकम्

२. ताजिकम्

३. प्रश्नः

सम्प्रति होरास्कन्धात् प्रश्ननामकः खण्डः पृथक्तया स्वतन्त्रस्कन्धरूपेण निर्मितः अस्ति। अत इदानीं होरास्कन्धस्य द्वौ विभागौ स्तः ।

१. जातकम् २. ताजिकम्

उक्तं च -

"होराशास्त्रं जातकं ताजिकञ्च"।

विशेष

यतोहि होराशास्त्रस्य प्रमुखविषयः जातकानां फलकथनम् अस्ति। अतः विद्वद्भिः होराशास्त्रमेव जातकशास्त्रम् इति नाम्ना बोध्यते।

जातकम्

होरास्कन्धस्य सः विभागः यत्र जातकस्य जन्मकालिक ग्रह-नक्षत्र-तिथि-राश्यादीन् आधारीकृत्य फलादेशः क्रियते जातकम् इति नाम्ना ज्ञायते। अस्याम् पद्धतौ जातकस्य जन्मकालिकग्रहानुसारेण जन्मकुण्डली निर्मीयते तद्वशाज्जातकस्य समस्तशुभाशुभ-फलज्ञानं भवति। अस्यां पद्धतौ जातकस्य जन्मकालिकचन्द्रनक्षत्रवशात् दशादीनां ज्ञानं भवति। विंशोत्तर्यादिदशा-गोचरमाश्रित्य फलप्राप्तिकालः निर्धार्यते।

बृहत्पाराशरहोराशास्त्रम्, लघुपाराशरी, बृहज्जातकम् , लघुजातकम्, जातकालंकारः, भावप्रकाशेत्यादयः प्रमुखाः जातकग्रन्थाः सन्ति।

ताजिकम्

होरास्कन्धस्य अस्यां पद्धतौ जातकस्य जन्मकालिकसमयानुसारं तस्य प्रतिवर्षं कुण्डलीं निर्माय तद्वशाज्जातकस्य वार्षिक-मासिक फलादेशः क्रियते। अस्याम् पद्धतौ यद्यपि ते एव नवग्रहाः तद्वर्षप्रवेश -मासप्रवेशकालिक स्थित्यनुसारेण स्थिताः भवन्ति। तथापि केचन नियमाः यथा दृष्टिविचारः मुन्थहा-पञ्चाधिकारि-हद्देशविचारः, इत्थशालादियोगाः पुण्यादिसहमाः, पात्त्यायिन्यादिदशा इत्यादि जातकग्रन्थेभ्यः भिन्नाः। जातकग्रन्थेषु तृतीय-दशमयोः चतुर्थाष्टयोः नवमपञ्चमयोः सप्तमे क्रमशः एकपाद - द्विपाद - त्रिपाद - पूर्णदृष्टयः भवन्ति, परन्तु ताजिकग्रन्थेषु ग्रहाणां प्रत्यक्षस्नेहा - गुप्तस्नेहा- प्रत्यक्षवैरा - गुप्तवैरा इत्येता चतुर्धा दृष्टिः भवति। जातकग्रन्थेषु रज्जु - मुशलेत्यादिनाभस योगाः प्रसिद्धाः सन्ति परन्तु ताजिकपद्धतौ इक्कबाल- इन्दुवार इत्यादि योगाः भवन्ति। अनेन प्रकारेण जातक ताजिकपद्धत्योः भिन्नता दृश्यते। विद्वान्स आमनन्ति यत् ताजिकपद्धतिः अरबदेशीयानाम् अस्ति, अयं न भारतीयपद्धतिः। ताजिकशास्त्रेषु विषयाः शब्दाश्च अरबीभाषायाः दृश्यन्ते। सारणीद्वारा जातक-ताजिक पद्धतौ अन्तरं ज्ञायते -

© राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१४

होराशास्त्रम्	
जातक पद्धतिः	ताजिक पद्धतिः
१. अस्यां पद्धतौ जातकस्य जन्मकालिक ग्रहानुसारं फलादेशः क्रियते।	१. अस्यां पद्धतौ वर्षप्रवेश/मासप्रवेशकालिक-ग्रहानुसारं वर्षविशेषस्य फलादेशः क्रियते।
२. अस्यां पद्धतौ दशान्तर्दशादिभिः भविष्यफलनिर्धारणं भवति।	२. अस्यां पद्धतौ गोचरफलज्ञानाय सहमानां चर्चा अस्ति।
३. अस्यां पद्धतौ ग्रहाणां एकपाद-द्विपाद त्रिपाद पूर्णदृष्टिः भवति।	३. ग्रहाणां प्रत्यक्षवैरा-गुप्तवैरा-प्रत्यक्षस्नेहा-गुप्तस्नेहा इति चतुर्धा दृष्टिः भवति।
४. अस्यां पद्धतौ ग्रहाणां स्थित्यनुसारं नाभसयोगाः निर्मीयन्ते। तेषां योगानां शुभाशुभं फलं विचार्यते।	४. अस्यां पद्धतौ ग्रहाणां स्थितिविशेषात् इक्कबाल-इन्दुवार-आदियोगाः निर्मीयन्ते। तद्वशात् शुभाशुभफलं ज्ञायते।
५. इयं पद्धतिः प्राचीनभारतीयपद्धतिः अस्ति।	५. इयं पद्धतिः आरबीयानाम् इति स्वीक्रियते।
६. अस्याः पद्धतेः विविधशास्त्राणि - बृहत्पाराशरहोराशास्त्रम् (महर्षिपराशरः) बृहज्जातकम् (वराहमिहिरः) केशवीयजातकपद्धतिः (केशवदैवज्ञः) जातकालंकारः (गणेशदेवज्ञः) जातकपरिजातः (वैद्यनाथः)	६. अस्याः पद्धतेः प्रमुख शास्त्राणि - ताजिकनीलकण्ठी (नीलकण्ठ दैवज्ञः) ताजिककौस्तुभ (बालकृष्णः) ताजकसुधानिधिः (नारायण दैवज्ञः) ताजकालंकारः (सूर्य दैवज्ञः) हायनरत्नम् (बलभद्रः)

२.५.५ होरास्कन्धस्य आवश्यकता

कः न इच्छति स्वकीयं शुभाशुभं ज्ञातुम्। जीवने कदा शुभः समयः आगमिष्यति कदा चाशुभः। शुभकाले अनुकूलकार्यव्यापारः अनुकूलफलप्राप्तिश्च भवति एवम् अशुभस्य दुष्फलपरिहारार्थं अशुभकालात् प्राक् अशुभकाले वा जप-तप-अनुष्ठानादिनाना-शान्तिकरणोपायं जनाः कुर्वन्ति। अतोऽयं होरास्कन्धः जातकस्य मनुष्यस्य वा आगामिशुभाशुभ-फलदर्शने सहाय्यं तथा अशुभफलस्य निराकरणाय उपायमपि निर्दिशति। होरास्कन्धस्य उपयोगित्वं वराहमिहिरस्य पदेऽस्मिन् दृश्यते -

यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः पक्तिम्।
व्यञ्जयति शास्त्रमेतत् तमसि द्रव्याणि दीप इव॥

अर्थात् यथा अन्धकारे स्थितपदार्थाः न दृश्यन्ते, परन्तु दीप प्रकाशेन तान् द्रष्टुम् शक्यते। तथैव पूर्वजन्मनि कृतस्य शुभाशुभकर्मणः फलं कदा केन प्रकारेण च

मिलिष्यति इति वयं न जानीमः परन्तु अस्य होराशास्त्रस्य ज्ञानेन एतत्सर्वं ज्ञातुं शक्यते।

इतोऽपि जातकस्य जन्मकुण्डल्या जातकः कस्मिन् कार्ये पटुः भविष्यति ? केन कर्मणा जातकः अर्थार्जनं करिष्यति ? जातकः कदा कष्टं प्राप्स्यति ? कस्यां दशायां जातकः यश - अपयश - हानि -लाभ - दुर्घटनादिनां भाजः भविष्यति ? अथवा जातकस्य स्वास्थ्यम् अग्रिमेषु वर्षेषु कथं भविष्यति ? जातकः कस्यां दशायां तस्य विदेशगमनम् ? कदा व्यापारे लाभः भविष्यति ? इत्यादीनां विवेचनम् अनेन शास्त्रेण क्रियते। सारावलीकारस्य कल्याणवर्मणः मते -

अर्थार्जने सहायः पुरुषाणामापदार्णवे पोतः।
यात्रासमये मंत्री जातकमपहाय नास्त्यपरः॥

पदच्छेदः

अर्थार्जने/सहायः/पुरुषाणां/आपदार्णवे/पोतः/यात्रा/समये/मंत्री/जातकम्/अपहाय/न/अस्ति/अपरः।

अन्वयः

पुरुषाणां अर्थाजने सहायः, आपदार्णवे पोतः, यात्रासमये मंत्री (च) जातकम् अपहाय अपरः नास्ति।

प्रतिपदार्थः

पुरुषाणां = मनुष्याणां, अर्थार्जने = धनोपार्जने, सहायः = सहायकः (मित्र सदृशः), आपदार्णवे = विपत्तिसागरे, पोतः = नौकासदृशः (तारकः), यात्रासमये = यात्राकाले, मंत्री = परामर्शदातारूपेण, (च = अपि), जातकम् = इदं जातकशास्त्रम्, अपहाय = वर्ज्य, अपरः = अन्यः, नास्ति = नैव अस्ति।

व्याख्या

यः ज्योतिषं जानाति सः अनया धनमुपार्जयति। य इदं शास्त्रं न जानाति तस्मै इदं ज्योतिषशास्त्रम् आजीविकानिर्धारणे मार्गदर्शनं करोति। विपत्तौ कः ग्रहः कारकः इति सङ्केतयित्वा तत्प्रीतिप्रदैः जप-तप-होमार्चानादिभिः सः ग्रहः तोषयितव्यः इति इदं शास्त्रं निर्दिशति। येन तत्सम्पाद्य जातकः विपदार्णवं तरति। अत एव ग्रन्थकारः ज्योतिषं विपदार्णवे पोतरूपं वदति। तथा च यात्राकाले मनुष्यस्य दशादि ज्ञानेन शुभाशुभकालं निरूप्य मन्त्री इव सहाय्यं करोति। इत्थं यावत् इदं जातकशास्त्रं मनुष्यस्य उपकारकं न तावत् अन्यत् किमपि शास्त्रम्।

२.६ संहितास्कन्धः

भवता सिद्धान्त-होरेति स्कन्धद्वयं पठितम्। एतयोर्विहाय अवशिष्टाः ये ज्योतिष-विषयकपदार्थाः ते सर्वे संहितास्कन्धे निरूपिताः।

वराहमिहिरः संहितास्कन्धं परिभाषितुम् उद्धरति -

"तत्कात्स्न्योपनयस्य नाम मुनिभिः सङ्कीर्त्यते संहिता"

अर्थात् यत्र निरवशिष्टाः ज्योतिषविषयाः सन्ति तस्य स्कन्धस्य नाम मुनिभिः संहिता इति कथिता।

© राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१४

संहितास्कन्धोऽपि फलादेशसम्बन्धिस्कन्धः कथितुं शक्यते। परन्तु अत्र व्यक्तिविशेषस्य फलकथनं नास्ति अपितु समूहे समाजे (नगरे प्रान्ते वा) पतितप्रभावस्य फलस्य कथनं व्याक्रियते।

२.६.१ संहितास्कन्धस्य विषयाः

संहितास्कन्धान्तर्गते समष्टिगतफलादेशविवेचनमपि अस्ति। अस्मिन् स्कन्धे केवलं ग्रहफलमेव नापितु, विविध पद्धत्यनुसारेण शुभाशुभज्ञानस्य विषयाः निरूपिताः वर्तन्ते। अतः अखिलब्रह्माण्डस्य समस्तविषयाः स्कन्धेऽस्मिन् निरूपिताः सन्ति। वराहमिहिरस्य प्रसिद्धे बृहत्संहिताग्रन्थे संहितास्कन्धस्य विषयाः एवम् निरूपिताः सन्ति -

दिनकरादीनां ग्रहाणां चाराः तेषां प्रकृतिः -विकृति -प्रमाण -वर्ण -किरण-द्युति -संस्थानास्तमनोदयमार्ग-मार्गान्तर -वक्रानुवक्रर्क्षग्रह-समागमादिनां फलम्, नक्षत्रकूर्मविभागेन भूस्थनगराणां देशानां वा नक्षत्रेषु स्थितिः ततः तन्नक्षत्राभिहितदेशेषु अगस्त्यादीनां नक्षत्रसञ्चरणमाश्रित्य विविधफल विवेचनम्, ग्रहभुक्ति, नक्षत्रव्यूह -श्रृङ्गाटक -ग्रहयुद्ध, समागमविचारः, ग्रहवर्षफलं, गर्भलक्षणं, रोहिणीस्वात्याषाढीयोगाः सद्योवर्षणफलम्, कुसुमलता -परिघ -परिवेष -उल्कादिग्दाह -भूकम्प -सन्ध्या -गन्धर्वपुर -रजोनिर्घातार्घकाण्डसस्यजन्म -इन्द्रध्वज -इन्द्रचाप -वास्तुविद्या -अङ्गविद्या -वायसविद्यान्तरचक्र -मृगचक्र -अश्वचक्र -वातचक्रादीनां लक्षणं तत्फलञ्च प्रासादलक्षण -प्रतिमालक्षण -प्रतिष्ठापन -वृक्षायुर्वेद -उद्कार्गल -नीराजन -खञ्जनकोत्पातशान्ति -मयूरचित्रक -घृतकम्बल -खड्गपट्ट, कृकच, कूर्म -गोऽजाश्वेभ -पुरुष -स्त्रीलक्षणानि तत्फलञ्च, पिटकलक्षण -उपानच्छेद -वस्त्रच्छेद -चामरदण्ड -शयनाऽऽसनलक्षण -रत्नपरीक्षा -दीपलक्षणादि विषयाः -दन्तकाष्ठाद्याश्रितानि शुभाऽशुभानि निमित्तानि इत्थं प्रायः सर्वेऽपि लौकिकाः विषयाः यत्र ग्रह-नक्षत्रादीनां प्रभावोऽनुभूयते अस्मिन् स्कन्धे।

वर्तमानकाले प्रचलिताः जलवायुविज्ञान-भूकम्पविज्ञान-वास्तुविज्ञान-रक्षोपकरणविज्ञानादिविषयाः वर्तन्ते ते संहितास्कन्धादेव निःसृत्य विकसिताः सञ्जाताः।

२.६.२ महर्षिनारदोक्तस्य संहितास्कन्धस्य विषयाः

महर्षिनारदेन नारदसंहितायामुल्लिखिताः संहिताविषयाः-

शास्त्रोपनयनाध्यायो ग्रहचारोऽब्दलक्षणम्।
तिथिर्वारञ्च नक्षत्रं योगं तिथ्यर्द्धसंज्ञकम्॥

मुहूर्त्तोऽपग्रहोऽर्कस्य सङ्क्रान्तिर्गोचरस्तथा।
चन्द्रतारावलाध्यायः सर्वलग्नार्तवाह्वयः॥

आधानपुंससीमन्तो जातनामान्नभुक्तयः।
चौलाङ्कुरार्पणे मौञ्जीच्छुरिकावन्धने क्रमात्॥

समावर्तन- उद्वाह -प्रतिष्ठाः सद्मलक्षणम्।
यात्राप्रवेशनं सद्योवृष्टिकर्म विलक्षणम्॥

उत्पातलक्षणं शान्तिर्मिश्रकं श्राद्धलक्षणम्।
सप्तत्रिंशद्भिरध्यायैर्नारदीयाख्यसंहिता॥

अर्थात् नारदसंहितायां सप्तत्रिंशत् अध्यायाः सन्ति ते -

तिथिलक्षणाध्यायः, वाराध्यायः, नक्षत्राध्यायः, योगाध्यायः, मुहूर्त्ताध्यायः,

उपग्रहाध्यायः, अर्कसङ्क्रान्त्यध्यायः, गोचराध्यायः, चन्द्रताराबलाध्यायः, सर्वलग्नाध्यायः, आर्तवाध्यायः, आधानाध्यायः, पुंसवनाध्यायः, सीमन्तोन्नयनाध्यायः जातकर्माध्यायः, नामकरणाध्यायः, अन्नप्राशनाध्यायः, चौलकर्माध्यायः, अङ्कुरार्पणाध्यायः, मौञ्जीकर्माध्यायः, छुरिकाधारणाध्यायः, व्रतबन्धाध्यायः, समावर्तनाध्यायः, विवाहाध्यायः, प्रतिष्ठाध्यायः, सद्मलक्षणाध्यायः, यात्राध्यायः, प्रवेशाध्यायः, सद्योवृष्टिकर्माध्यायः, विलक्षणाध्यायः, उत्पातलक्षणाध्यायः, शान्त्यध्यायः, मिश्रकाध्यायः, श्राद्धलक्षणाध्यायः,, इत्थं सप्तत्रिंशद्भिरध्याययुक्तमिदं नारदसंहिता।

२.६.३ संहितास्कन्धस्य आवश्यकता

संहितास्कन्धस्य विषयान् ज्ञात्वा तस्य अध्ययनस्यावश्यकता सहजतयैव विज्ञायते। संहितास्कन्धे ये विषयाः ते लोककल्याणकारिणः दृश्यन्ते। तत्र वर्णितग्रहचारवशात् राज्ये शान्तिः कलहो वा, समृद्धिः विपन्नता वा, राजभयम् राजपरिवर्तनं वेति पूर्वमेव ज्ञातुम् पार्यते येन तदर्थम् उपायमपि समयेन भवेत्। भूकम्पागमनस्य दिग्दाह-उल्कापातादि-विविधोत्पाततस्य ज्ञानम् यदि पूर्वं भवेत् तदा जन-धन-रक्षणोपायांश्च कर्तुं शक्यते। वृष्ट्यादिज्ञानं संहिताज्ञानेनैव भवति। सस्य वृद्धिर्हानिर्वा, वस्तूनां मूल्यवृद्धिर्हानिर्वा इत्यादिविषयाणां ज्ञानमपि संहितास्कन्धेनैव भवति। संहितायां वर्णिताः मुहूर्त्तविषयाः मनुष्यस्य यात्रा-गृहप्रवेश-उपनयनविवाहादिषोडशसंस्कार-कृषिकर्म-व्यापारादिकार्यसम्पादनाय समयनिर्धारणं करोति। यदि मनुष्यः शुभे मुहूर्त्ते कार्यं करोति तदा कार्यसिद्धिः अशुभे कार्यहानिश्च संजायते। अतः कस्यचिद् कार्यस्य उपयुक्तकालविवेचनात् अयं संहितास्कन्धः अत्यधिकं महत्त्वपूर्णं दृश्यते। वाराहमिहिरः वदति यत् -

मुहूर्त्ततिथिनक्षत्रमृतवश्चायने तथा।
सर्वाण्येवाकुलानिस्युर्न स्यात् सांवत्सरो यदि॥

पदच्छेदः

मुहूर्त्त / तिथि / नक्षत्रं / ऋतवः / च / अयने / तथा / सर्वाणि / एव / अकुलानि / स्युः / न / स्यात् / सांवत्सरः / यदि।

अन्वयः

यदि सांवत्सरः न स्यात् (तदा) मुहूर्त्त -तिथि -नक्षत्रं -ऋतवः अयने (एतानि) सर्वाण्येव अकुलानि स्युः।

प्रतिपदार्थः

यदि = चेत् (अव्ययवाची), सांवत्सरः = तिथ्यादीनां ज्ञाता संहितापारगः दैवज्ञः, न स्यात् = न भवेत् (तदा) मुहूर्त्तः = यात्रादिमुहूर्त्तज्ञानं विना, तिथि = तिथिज्ञानं विना, नक्षत्रं = नक्षत्रज्ञानं विना, ऋतवः = षडर्त्तवः वसन्तादिकं तज्ज्ञानं विना, तथा च = अपि, अयने = उत्तर-दक्षिणायनप्रवृत्तिज्ञानं विना, (एतानि) सर्वाणि = मुहूर्तादीनां व्यवस्थाः (सम्यग्ज्ञानाभावे), आकुलानि = भ्रमात्मिकाः, स्यु = भवेयुः।

व्याख्या

यदि मुहूर्त्तादिकस्य ज्ञाता दैवज्ञः न भवेत् तदा तिथ्यादीनां, सम्यग् ज्ञानं न भवितुं शक्नोति अतः तिथ्यादिनाम् असत्काले प्रवर्तमानत्वात् महदव्यवस्था जायेत्।

मुहूर्त्तादिसंहिताविषयज्ञः सांवत्सरो यदि न स्यात्तर्हि एते मुहूर्त्तादिविषयाः लुप्तप्रायाः स्युः इति। तेन हि उक्तम् यत् अन्यान् विषयान् यद्यपि न सर्वे ज्ञातुमिच्छन्ति

© राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१४

तथापि ज्ञानाभावात् मुहूर्त्त-ग्रहचारफलविषयान् वनवासिनोऽपि पृच्छन्ति। यथा -

वनं समाश्रितो येऽपि निर्ममा निष्परिग्रहाः।
अपि ते परिपृच्छन्ति ज्योतिषां गतिकोविदं॥ इति॥

पदच्छेदः

वनं / समाश्रिता / ये / अपि / निर्ममा / निष्परिग्रहाः / अपि / ते / परिपृच्छन्ति / ज्योतिषां / गति / कोविदं।

अन्वयः

ये वनं समाश्रिता निर्ममा निष्परिग्रहा च ते अपि ज्योतिषां गतिकोविदं परि पृच्छन्ति।

प्रतिपदार्थः

ये = ये मनुष्याः, वनं समाश्रिता = वने निवासिनः, निर्ममा = निर्गताः मोहादिभावाः येषु ते निर्मोहीनः सन्यासिनः, निष्परिग्रहाः = वैरागिणः, ते = तादृशः मनुष्या अपि, ज्योतिषां = ग्रहनक्षत्राणां, गति = चारः, कोविदं = जानाति यः तं गतिकोविदं दैवज्ञं, परिपृच्छन्ति = तज्ज्ञानाय पृच्छन्ति।

व्याख्या

ये खलु वनवासिनः स्वकुटुम्बादिकं त्यक्त्वा सन्यासिनः जाताः रागद्वेष रहितास्ते वैरागिणोऽपि दैवज्ञं ग्रहगतिस्थित्यादिकं पृच्छन्ति । ज्ञातुमिच्छन्ति इति भावः।

बृहत्संहितायामेव वराहमिहिरेणोक्तम् यत् युद्धादिकालस्याभीष्टमुहूर्त्तविवेचनात् तथा राज्ये दुर्भिक्षस्य पूर्वज्ञानकथनात् तस्य उपायमपि विवेचनात् एकः दैवज्ञः यादृक् राज्यस्य साहाय्यं करोति न तादृक् अन्ये केऽपि। यथा -

न तत्सहस्रं करिणां वाजिनां च चतुर्गुणम् ।
करोति देशकालज्ञो यथैको दैवचिन्तकः॥

पदच्छेदः

न / तत् / सहस्रं / करिणां / वाजिनां / च / चतुर्गुणम् / करोति / देश / कालज्ञो / यथैको / दैवचिन्तकः।

अन्वयः

यथैकः देशकालज्ञः दैवचिन्तकः करोति, तत् सहस्रकरिणां चतुर्गुणं वाजिनां च न (भवितुं शक्नोति)।

प्रतिपदार्थः

यथा = यादृशः, एकः = एकः, देशकालज्ञः = देशकालवित्, दैवचिन्तकः = दैवज्ञः, कार्यं (साहाय्यं) करोति, तत् = तथा, सहस्रकरिणां = सहस्रगजैः, चतुर्गुणम् = चतुस्सहस्रैः वाजिभिः अश्वैः, च = अपि, न = नैव कर्तुं शक्यते।

व्याख्या

एकः देशकालज्ञः दैवज्ञः राज्याभिवृद्धये नृपानुकूलं युद्धादिकालं निर्धार्य राज्यस्य यावत् साहाय्यं करोति तावत् गज-तुरग-पदातियुतसैन्यबलेन न कर्तुं शक्यते।

७. होराशब्दः कस्मात् शब्दात् उपपन्नः?

.....

.....

८. एकस्मिन् अहोरात्रे कति होराः भवन्ति?

.....

.....

९. होरास्कन्धस्य कस्याम् पद्धतौ प्रत्यक्षवैरा दृष्टिः भवति?

.....

.....

१०. संहितास्कन्धे जातकस्य फलादेशसम्बन्धिविवेचनम् अस्ति, सत्यमसत्यं वा?

.....

.....

२.७ पञ्चस्कन्धेषु प्रश्नस्कन्धः

प्रश्नलग्नमाधारीकृत्य फलकथनं यस्मिन् शास्त्रे क्रियते तत् प्रश्नशास्त्रमित्युच्यते। भवता पूर्वमेव पठितं यत् प्रश्नशास्त्रं होरास्कन्धस्य अन्यतमम् अङ्गमासीत् पुरा, परन्तु इदानीं इदं स्वतन्त्रस्कन्धरूपेण परिगणितं वर्तते। यद्यपि इदमपि अस्ति फलादेशविषयकं, तथापि अस्य केचन नियमाः होराशास्त्रात् भिन्नाः सन्ति। यथा कश्चिद् जिज्ञासुः स्वसमस्यायाः निराकरणार्थं दैवज्ञं पृच्छति यत् अहम् अमुं कार्यं करोमि तस्मिन् साफल्यं प्राप्स्यामि न वा? अथवा कस्यचित् वस्तुनः अपहरण सम्बन्धिप्रश्नं प्राश्निकः दैवज्ञं पृच्छति यत् मम वस्तु अपहृतम् ? केन चोरितम्? मिलिष्यति न वा? अथवा रोगी आरोग्यं प्राप्स्यति न वा? पुनश्च गर्भप्रश्ने पुत्रः पुत्री वा ? इत्यादिप्रश्न जिज्ञासायाः निराकरणार्थम् अयम् प्रश्नस्कन्धः निर्मितः।

प्रश्नस्य समाधानार्थं बहवः प्रकाराः विद्यन्ते तेषु प्रमुखयोः द्वयोः संक्षिप्तपरिचयः अत्र प्रस्तूयते–

१. प्रश्नलग्नमाधारीकृत्य।

२. प्रश्नाद्यक्षरमाधारीकृत्य।

१. **प्रश्नलग्नमाधारीकृत्य फलकथनम्**– पृच्छकः यस्मिन् काले स्वप्रश्नं पृच्छति तत् कालिकं लग्नं विज्ञाय तथा ग्रहस्पष्टं कृत्वा तस्य कालस्य कुण्डली निर्मीयते तथा तदनुसारेण पृच्छकस्य प्रश्न-फलं दीयते। वस्तुतः प्रश्नस्कन्धस्य अयमेव प्रसिद्धनियमः। तदेव उक्तम् -

"प्रश्नलग्नमाधारीकृत्य फलादेशकं शास्त्रं प्रश्नशास्त्रमिति।"

२. **प्रश्नाद्यक्षरमाधारीकृत्य फलकथनम्** – अस्यां पद्धतौ प्रश्नस्य आद्यक्षरानुसारं वा पृच्छकोच्चरितानां फल-पुष्प-देव-सरोवरादीनां नामं स्वीकृत्य तदनुसारेण फलविवेचनम् क्रियते। प्रश्नशकुनमपि अस्य अङ्गरूपेण अस्ति।

© राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१४

२.७.१ प्रश्नस्कन्धस्य विषयाः

यथा भवता पूर्वं पठितं प्रश्नस्कन्धे प्रश्नलग्नमाश्रित्य प्रश्नकुण्डली निर्मीयते। प्रश्नलग्ननिर्धारणस्य बहवः प्रकाराः सन्ति। प्रश्नकुण्डल्यां केचन ताजिकसिद्धान्ताः यथा इत्थशालादियोगाः अपि प्रयुज्यन्ते। किन्तु जातकस्कन्धे प्रयुज्यमानाः नाभसादियोगाः प्रायः न उपयुज्यन्ते। अत्र दशाऽन्तर्दशाया अपि उपयोगः न भवति। अन्ये ग्रहस्वरूप -राशिस्वरूप, ग्रहदृष्टित्यादि विषयाः अत्र वर्णिताः सन्ति।

प्रश्नाक्षरमाधारीकृत्य विवेचनार्थं अ क च ट त प य श इत्येते वर्गाः तेषां स्वामिनः तत्फलं च वर्णितम्। प्रश्नस्कन्धे प्रश्नशकुनस्य विशिष्टं महत्त्वमस्ति। अनेन कार्यस्य शुभाशुभज्ञानार्थं शुभाशुभशकुनं विचार्यते तदनुसारं प्रश्नस्य समाधानं क्रियते।

२.८ शकुनस्कन्धः

संहितास्कन्धात् निःसृतः स्कन्धरूपेण विकसितोऽयं शकुनस्कन्धः। प्रायः विविधानां पशुपक्षिणां कदाचित् मनुष्याणां वा कालविशेषे कार्यविशेषे वा ज्ञात्वा अज्ञात्वा वा यत् सामान्यं विशिष्टं वा आचर्यते तत् भवितव्यशुभाशुभघटनायाः सूचकं भवति तस्यैव सूचकस्य शकुनम् इति संज्ञा।

२.८.१ शकुनम्

सामान्यतया वयं पश्यामः यत् कश्चन् यात्रा कर्त्तुम् उद्यतः तस्मिन्नेव क्षणे यदि कोऽपि छिक्कति, तदा यात्री यात्रायाः स्थगनं करोति अथवा किञ्चित् क्षणं स्थित्वा पुनः गच्छति अथवा किञ्चित् शुभखाद्यपदार्थं दध्यादिकं खादित्वा पुनः यात्रारम्भं करोति। कथ्यते यत् यात्राकाले छिक्का अपशकुनं भवति। तथैव यात्राकाले अथवा कश्चित् कार्यारम्भे एव पद्म-दर्पण-विप्रदर्शनं भवति तदा कार्यस्य साफल्यं भविष्यति इति वयं पूर्वमेव जानीमः यतो हि पद्मादिशुभ शकुनानि दृष्टानि।

अतः जीवने भवितव्यानां घटनानां पूर्वमेव दैहिक-दैविक-भौतिकचिन्हरूपेण पूर्वघटितं सूचकमेव शकुनं भवति। तथा च एतत् ज्ञानं ज्योतिषशास्त्रस्य शकुनस्कन्धे निरूपितम्।

२.८.२ शकुनस्कन्धस्य विषयाः

दैहिक-दैविक-भौतिकेतित्रिविधं सूचकं भवन्ति। तेषु सूचक चिन्हेषु अङ्गस्फुरणं, स्वप्नदर्शनं, छिक्काज्ञानं, पल्लीपतनं, विप्र-अश्व-पद्म-घट-शव-दर्पणेत्यादिदर्शनं, मूर्तिचलनं, उल्कापातः, धूमकेतुदर्शनेत्यादीनां शकुनानां अस्मिन स्कन्धे विमर्शिताः सन्ति।

२.९ ज्योतिषशास्त्रस्य स्कन्धेषु मुहूर्त्तस्य स्थानम्

ज्योतिषशास्त्रे संहितास्कन्धान्तर्गतम् इदं मुहूर्त्तविज्ञानम् परिगणितं वर्तते। तिथि-वार-नक्षत्रादीनां स्थितिवशात् कालविशेषः मुहूर्त उत्पद्यते। प्रत्येकं मुहूर्तः कार्यविशेषाय शुभावहः अपरस्मै कार्याय अशुभप्रदो भवति। व्यापाराय मुहूर्त्तः राज्यप्रसिद्धिविस्तार युद्धादिमुहूर्त्तः इत्यादि मुहूर्त्तविषयाः राष्ट्रस्य अथवा जगत कल्याणाय सन्ति न तु जातक विशेषस्य। इत्थं मुहूर्तविषयाः समष्टिगतफलनिर्धारणे सहायकाः सन्ति अतः संहितास्कन्धे अस्य गणना कृता पूर्वैः। प्राचीन नारदसंहितायां मुहूर्त्त-नामक एकः स्वतन्त्राध्यायः अस्ति। बृहत्संहितायामपि

विभिन्नेषु स्थलेषु राज्याभिषेक-वास्तु-स्नानादिमुहूर्ताः वर्णिताः सन्ति। कालान्तरे बहवः मुहूर्तग्रन्थाः यथा - मुहूर्तचिन्तामणिः, मुहूर्तगणपतिः, मुहूर्तपदवी, रत्नमाला, मुहूर्तमार्तण्डः इत्यादि निर्मिताः।

बोधप्रश्नाः

११. प्रश्नस्कन्धः कस्मात् स्कन्धात् उत्पन्नः?

.....

.....

१२. यात्रासमये छिक्का शुभशकुनं भवति न वा ?

.....

.....

१३. प्रश्नस्कन्धे प्रश्नलग्नं प्रयुज्यते वा जन्मलग्नम् ?

.....

.....

१४. पल्लीयपतनस्य विचारः ताजिकशास्त्रे भवति सत्यं मिथ्या वा?

.....

.....

२.१० सारांशः

पाठोऽयं वेदचक्षूरूपस्य ज्योतिषशास्त्रस्य स्कन्धान् निरूपयति। अस्मिन् पाठे ज्योतिषशास्त्रस्य स्कन्धानां चर्चा कृता। तत्र प्रस्तावनानन्तरं तृतीये पाठ्यांशे ज्योतिषशास्त्रस्य त्रिस्कन्धात्मकस्वरूपं पञ्चस्कन्धात्मकस्वरूपञ्च भवान् अधीतवान् । अनन्तरं चतुर्थे पाठ्यांशे सिद्धान्तस्कन्धस्य विषयास्तत्र सौरादिपञ्चसिद्धान्तानां वर्णनं कृतम्। पञ्चमे पाठ्यांशे होरास्कन्धः निरूपितः। अहोरात्र शब्दान्निष्पन्नो होराशब्दः कालवाचकः अस्ति। अहोरात्रेव द्वादशलग्नप्रवर्तनात् लग्नमाश्रितत्य जन्मचक्रे फलनिर्धारणाच्च अयं जातकस्कन्धः होरास्कन्ध इत्यपि उच्यते। होरास्कन्धस्य शास्त्रनिरूपणपूर्वकं तस्य जातक-ताजिकेति भेदद्वयमपि अधीतम्। षष्ठे पाठ्यांशे संहितास्कन्धस्य विषयाः निरूपिताः सन्ति। सप्तमे पाठ्यांशे होरास्कन्धात् प्रादुर्भूतस्य शकुनस्कन्धस्य विवेचनं कृतम्।

२.११ शब्दावली

१.	तन्त्रम्	=	सिद्धान्तज्योतिषस्य एकः प्रकारः।
२.	अहर्गणम्	=	दिनरात्रिसमूहः।
३.	जातकः	=	यस्य जन्म भवति।
४.	जातकशास्त्रम्	=	फलादेशसम्बन्धिशास्त्रम्।
५.	व्यञ्जयति	=	दर्शयति।
६.	सांवत्सरः	=	दैवज्ञः।

© राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१४

७. करिन् = गजः।

८. वाजिनः = अश्वाः।

२.१२ सन्दर्भग्रन्थः

१. भारतीयज्योतिषशास्त्रस्येतिहासः, लोकमणि दाहाल।

२.१३ सहायकग्रन्थाः

१. भारतीय ज्योतिष, शङ्करबालकृष्णदीक्षित, अनु. - डॉ. शिवनाथ झारखण्डी, उ.प्र. हिन्दी संस्थान, लखनऊ, उ.प्र.।

२. बृहत्संहिता।

३. सूर्यसिद्धान्त।

४. भारतीयज्योतिषशास्त्रस्येतिहासः।

२.१४ बोधप्रश्नोत्तराणि

१. त्रयः।

२. सिद्धान्तस्कन्धे।

३. ते पञ्चसिद्धान्ता -

१. सौरः २. पौलिशः ३. रोमकः ४. वाशिष्ठः ५. पैतामहश्च।

४. त्रयः - १. सिद्धान्तः २. तन्त्रम् ३. करणम्।

५. करणग्रन्थः।

६. मिथ्या यतोहि तन्त्रे अभीष्टयुगाद् कालगणना भवति।

७. होराशब्दः अहोरात्र-शब्दात् निष्पन्नः।

८. एकस्मिन्नहोरात्रे चतुर्विंशतिः (24) होराः भवन्ति।

९. ताजिकपद्धतौ।

१०. असत्यम्। यतो हि जातकस्य फलसम्बन्धि-विवेचनं होरास्कन्धे अस्ति।

११. जातकस्कन्धात्।

१२. न भवति।

१३. प्रश्नलग्नम्।

१४. मिथ्या यतो हि पल्लीपतनस्य विचारः शकुनस्कन्धे क्रियते।

२.१५ अभ्यासप्रश्नाः

१. सिद्धान्तस्कन्धस्य विषयान् निरूपयतु।

२. "राश्यर्धभोगकालः होरा" प्रतिपाद्यताम्।

३. जातकताजिकयोर्मध्ये अन्तरत्रयं निरूप्यताम्।

—•—

© राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१४

तृतीयः पाठः (मुहूर्त्तपदाध्यायः)

पाठसंरचना

३.१ प्रस्तावना
३.२ उद्देश्यम्
३.३ मुहूर्त्तः
३.३.१ कालखण्डः मुहूर्त्तः
३.३.२ पञ्चदशमुहूर्त्ताः
३.३.३ वराहमिहिरस्य विशेषमतम्
३.४ मुहूर्त्तसम्बन्धिताः विषयाः
बोधप्रश्नाः
३.५ मुहूर्त्तज्ञानस्य आवश्यकता
३.५.१ मुहूर्त्तस्य महत्त्वम्
३.५.२ मुहूर्त्तदोषस्य दुष्परिणामः
३.६ मुहूर्त्तग्रन्थाः
३.७ मुहूर्त्तग्रन्थेषूत्तमा मुहूर्त्तचिन्तामणिः
बोधप्रश्नाः
३.८ सारांशः
३.९ शब्दावली
३.१० सन्दर्भग्रन्थाः
३.११ सहायकग्रन्थाः
३.१२ बोधप्रश्नोत्तराणि
३.१३ अभ्यासप्रश्नाः

३.१ प्रस्तावना

भवता वेदाङ्गेषु श्रेष्ठतमस्य कालविधायकशास्त्रस्य विषये पठितम्। वेदस्य चक्षुर्भूतम्। ज्योतिषशास्त्रं वेदप्रयुक्तयज्ञादीनां सम्पादनार्थं शुभाशुभकालं निर्दिशति। अतएव ज्योतिषशास्त्रस्य वेदाङ्गत्वम्। उच्यते–

वेदास्तावत् यज्ञकर्मप्रवृत्ताः
यज्ञा प्रोक्तास्ते तु कालाश्रयेण।
शास्त्रादस्मात् कालबोधो यतः स्यात्
वेदाङ्गत्वं ज्योतिषस्योक्तमस्मात्॥

ज्योतिषशास्त्रस्य बहवः विषयाः सम्प्रति विकसिताः वर्तन्ते। यथा भवता पूर्वमधीतं सिद्धान्त त्रिषु स्कन्धेषु विभक्तस्य ज्योतिषशास्त्रस्य नित्यनैमित्तिककार्येषु संहितास्कन्धान्तर्गते परिगणितः मुहूर्त्त-विषयः शुभाशुभकालबोधनाय एव निरूपितः ततः कालान्तरे अयमपि विभाग स्वतन्त्रतया विकसितः मुहूर्तशास्त्रम् इति नाम्ना प्रथितः।

प्रस्तुते पाठेऽस्मिन् भवान् ज्योतिषशास्त्रस्य मुहूर्त्तविज्ञानस्य विषये पठिष्यति। एतस्मिन् पाठे मुहूर्त्तस्य परिभाषा तस्य कालरूपेण प्रतिपादनं तस्योपयोगित्वं तथा च मुहूर्त्तसम्बन्धि-विविधग्रन्थपरिचयः उपस्थाप्यते।

३.२ उद्देश्यम्

एतस्य पाठस्य अध्ययनेन भवान् –

- मुहूर्त्तस्य परिभाषां प्रतिपादयितुं समर्थो भविष्यति।
- मुहूर्त्तस्य कालमाननिरूपणं कर्तुं शक्ष्यति।
- मुहूर्त्तविज्ञानस्य वैशिष्ट्यं निरूपयितुं शक्ष्यति।
- मुहूर्त्तसम्बन्धि विविधग्रन्थान् वक्तुं पारयिष्यति।

३.३ मुहूर्त्तः

यदा वयं नूतनकार्यस्य आरम्भं कुर्मः तदा तत्कार्यारम्भात् प्राक् पृच्छामः यदहम् एतत् कार्यं कर्तुम् इच्छामि, एतदर्थम् उपयुक्तं कालं निर्दिशतु यत् कदा कार्यारम्भः शुभ इति। उदाहरणार्थं कस्मिंश्चित् गृहे यदि विवाहः सुनिश्चितः तर्हि विवाहाय कः काल सर्वथोपयुक्त इति कालज्ञं पृच्छन्ति। सः पुरोहितः एकां सुदीर्घां पत्रिकां पञ्चाङ्गमिति दृष्ट्वा गुर्वस्त-शुक्रास्त भद्रेत्यादिकं विचार्य विवाहोपयुक्तं दिनादिकं सूचयति। अमुकदिनस्य अमुस्मिन् कालविशेषे विवाहस्य शुभलग्नमस्ति इत्यपि निर्दिशति। तेन पुरोहितेन यः दिनादिकः काल निर्दिष्टः तस्य मुहूर्त इति संज्ञा। सः विवाहमुहूर्तः कथ्यते। अतः कस्यचित् कार्यस्य कृते उपयुक्तः कालः एव मुहूर्त्त इति शब्देन व्यपदिश्यते। उक्तं हि –

"कालः शुभक्रियायोग्यो मुहूर्त्त इति कथ्यते।"

अर्थात् कस्यचित् कार्यस्य सम्पादनाय उपयुक्तः शुभकालः तस्य कार्यस्य मुहूर्त्तः भवति।

३.३.१ कालखण्डः मुहूर्त्तः

वैदिककाले मुहूर्त्तशब्दः वस्तुतः दिनस्य अथवा रात्रेः कालखण्डविशेषाय प्रयुक्तः। एतादृशः कालखण्डः सामान्यतया घटिकाद्वयात्मको भवति।

अह्नः पञ्चदशो भागस्तथा रात्रिप्रमाणतः।
मुहूर्त्तमानं द्वे नाड्यौ कथिते गणकोत्तमैः॥

पदच्छेदः

अह्नः / पञ्चदशो / भागः / तथा / रात्रि / प्रमाणतः / मुहूर्त्तमानं / द्वे / नाड्यौ / कथिते / गणक / उत्तमैः।

अन्वयः

गणकोत्तमैः अह्नः तथा रात्रिप्रमाणतः पञ्चदशो भागः मुहूर्त्तमानं (तत्) द्वे नाड्यौ कथिते।

प्रतिपदार्थः

गणकोत्तमैः = श्रेष्ठदैवज्ञैः, अह्नः = दिनस्य, तथा = च , रात्रिप्रमाणतः = रात्रिमानस्य, पञ्चदशो भागः = पञ्चदशः अंशः, $\left(\frac{\text{दिन/रात्रिमानम्}}{15}\right)$ मुहूर्त्तमानम् = एकस्य

© राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१४

मुहूर्त्तस्य मानम् (तत् तु) द्वे नाड्यौ = घटीद्वयम्, कथिते = निश्चिते।

व्याख्या

नारदसंहितायां मुहूर्त्तस्य मानं निरूपितं वर्तते यत् एकस्य दिनमानस्य अथवा रात्रिमानस्य पञ्चदशः भागः मुहूर्त्तः भवति। यतो हि एकस्मिन् अहोरात्रे षष्टिघट्यः भवन्ति, अतो दिनमानस्य (सामान्यतया स्थूलतया वा त्रिंशत्घट्यात्मकस्य) पञ्चदशः = $\frac{30}{15}$ = 2 घटी भवति। अतः दिनमानस्य पञ्चदशः भागः घटिके द्वे एकस्य मुहूर्त्तस्य मानम् तथैव रात्रेरपि इति गणकोत्तमैः उक्तम्।

३.३.२ पञ्चदशमुहूर्त्ताः

दिनस्य रात्रेर्वा पञ्चदशात्मकः भागः मुहूर्त्तः इति ज्ञातम्। अतः तदनुपातेन एकस्मिन् दिवसे अथवा एकस्याम् रात्रौ पञ्चदशमुहूर्त्ताः भवति। यथा हि –

एकस्य दिनस्य पञ्चदशः भागः = एकः मुहूर्त्तः

$$\frac{\text{दिनमानम्}}{15} = 1 \text{ मुहूर्त्तः}$$

दिनमानम् = 15 x 1 = 15 मुहूर्त्ताः

अतः सम्पूर्णे दिनमानकाले पञ्चदशमुहूर्त्ताः भवन्ति।

तथैव रात्रावपि।

पुराणेषु दिनस्य रात्रेश्च पञ्चदशमुहूर्त्तानां भिन्न-भिन्नसंज्ञा कथिता। तद्यथा –

रौद्रश्चैव तथा श्वेतो मैत्रो सारभटस्तथा।
सावित्रो विरोचनश्च जयदेवोऽभिजित्तथा।
रावणो विजयश्चैव नन्दी वरुण एव च।
यम सौम्यौ भगश्चान्ते पञ्चदश मुहूर्त्तकाः॥

अर्थात् दिनभागस्य अथवा रात्रिभागस्य पञ्चदश-पञ्चदश मुहूर्त्ताः एते क्रमेण सन्ति –

1.	रौद्रः	2.	श्वेतः	3.	मैत्रः	4.	सारभटः
5.	सावित्रः	6.	विरोचनः	7.	जयदेवः	8.	अभिजित्
9.	रावणः	10.	विजयः	11.	नन्दी	12.	वरुणः
13.	यमः	14.	सौम्यः	15.	भगः इति।		

३.३.३ वराहमिहिरस्य विशेषमतम्

आचार्यवराहमिहिरस्य मते पञ्चदशमुहूर्त्तानां नामानि किञ्चिद् भिन्नम् अस्ति। तेषाम् अनुसारेण मुहूर्त्तानां संज्ञा तेषां स्वामिरूपेण गणिता। तद्यथा –

शिवभुजङ्गमित्रपित्र्यवसुजलविश्वविरञ्चिपङ्कजप्रभवाः।
इन्द्राग्नीन्दुनिशाचरवरूणार्यमयोनयश्चाह्नि॥

पदच्छेदः

शिव / भुजङ्ग / मित्र / पित्र्य / वसु / जल / विश्व / विरञ्चि / पङ्कजप्रभवः / इन्द्राग्नि / इन्दु / निशाचर / वरूण / अर्यमा / योनयः / च / अहि्न।

अन्वयः

अहि्न (क्रमेण) शिव-भुजङ्ग-मित्र-पित्र्य-वसु-जल-विश्व-विरञ्चि-पङ्कजप्रभवः-इन्द्राग्नि-इन्दु-निशाचर-वरूण-अर्यमा-योनयः (एते मुहूर्त्ताः)।

प्रतिपदार्थः

अहि्न = दिवसे (क्रमेण = क्रमशः), शिवः, भुजङ्गः = सर्पः, मित्रः = सूर्यस्य पर्यायः, पित्र्यः = पितरः, वसुः = अष्ट वसवः, जलं = वरूणदेवः, विश्वः = विश्वेदेवः, विरञ्चिः = ब्रह्मा, पङ्कजप्रभवः = ब्रह्मा, इन्द्राग्निः = इन्द्रः (देवविशेषः), इन्दुः = चन्द्रमा, निशाचरः = राक्षसः, वरुणः = वरुणदेवः, च = अपि, अयर्मा = सौरदेवः, योनिः = भगदेवता (एते मुहूर्त्ताधिपतयः)।

व्याख्या

आचार्यवराहमिहिरः दिनस्य अथवा रात्रेः पञ्चदशमुहूर्त्तानाम् संज्ञा मुहूर्तस्वामिनः संज्ञामाश्रित्य स्थापिताः। तेन यस्य मुहूर्तस्य योऽधिपतयः देवः तस्यैव देवस्य नाम्ना सः मुहूर्तः अभिहितः। अर्थात् शिवसंज्ञकः प्रथमः मुहूर्तः तस्य मुहूर्तस्य स्वामी शिवः। द्वितीयमुहूर्तस्य स्वामी भुजङ्गः अतस्तन्नामाश्रित्य द्वितीयमुहूर्तस्य संज्ञा विहिता। एवङ्क्रमेण पञ्चदशमुहूर्तानां संज्ञा विहिता। ते एवं सन्ति -

1.	शिवः	2.	भुजङ्गः	3.	मित्रः	4.	पित्र्यः
5.	वसुः	6.	जलम् (वरूणः)	7.	विश्वः	8.	विरञ्चिः
9.	ब्रह्मा	10.	इन्द्राग्निः	11.	इन्दुः	12.	निशाचरः (राक्षसः)
13.	वरुणः	14.	अर्यमा	15.	भगः।		

वराहमिहिरस्य मतानुसारेण यस्मिन्नक्षत्रे यस्य कार्यस्य निर्देशः अस्ति तत् कार्यम् तस्य नक्षत्राधिपतेः देवस्य मुहूर्तेऽपि कर्त्तुं शक्यते। यथा -

यत्कर्म यस्य नक्षत्रे तद्दैवत्यासु तिथिषु कार्यम्।
करणं मुहूर्त्तेष्वपि तत् सिद्धिकरं देवतासदृशम्।

पदच्छेदः

यत् / कर्म / यस्य / नक्षत्रे / तद् / दैवत्यासु / तिथिषु / कार्यम् / करणं / मुहूर्त्तेषु / अपि / तत् / सिद्धिकरं / देवता / सदृशम्।

अन्वयः

यत्कर्म यस्य नक्षत्रे (निर्दिष्टं) तत् (कर्म) दैवत्यासु तिथिषु कार्यम्। तत् करणं देवता सदृशं मुहूर्त्तेषु अपि (कार्यम्) सिद्धिकरं (भवति)।

प्रतिपदार्थः

यत्कर्म = यत्कार्य, यस्य = यस्य देवतायाः, नक्षत्रे = नक्षत्रविशेषे, (निर्दिष्टं = कथितम्) तत् = तत् कार्यं, देवत्यासु तिथिषु = देवानां तिथिषु (येषां तिथीनां

© राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१४

ते देवताः स्वामिनः तासु तिथिषु) कार्यम् = करणीयं, तत् करणं = कार्यम्, देवतासदृशं मुहूर्तेषु = यस्य नक्षत्रस्य यस्य मुहूर्तस्य च अधिपतिः तुल्यः स्यात् तस्मिन् मुहूर्तेऽपि सम्पादनीयम् (चेत्) सिद्धिकरं = सिद्धिप्रदं-फलप्रदं भवति।

व्याख्या

आचार्यवराहमिहिरस्य मतानुसारेण यस्मिन् नक्षत्रे यत् कार्य कर्त्तुं निर्दिष्टमस्ति तत् कार्यं तन्नाक्षत्रदेवतायाः तिथौ वा मुहूर्त्तेऽपि कर्त्तुं शक्यते। वस्तुतः प्रत्येकं नक्षत्रस्य ध्रुवादिसंज्ञा मुहूर्त्तग्रन्थेषु कृता विद्यते। तेषां नक्षत्राणां तत्संज्ञाविधाने हेतुभूताः भवन्ति तन्नक्षत्राधिपतिदेवाः। यस्य देवस्य यत्स्वरूपं तदनुगुणं कार्यम्। यथा रोहिणी-नक्षत्रस्य देवः ब्रह्मा अस्ति। ब्रह्मणः स्थैर्यत्वात् अस्य नक्षत्रस्यापि ध्रुवम् इति संज्ञा एवं यथा ब्रह्मणः कार्यम् उत्पादनं सर्जनं तदनुसृत्य रोहिण्यामपि बीजवपनादिकार्याणि कर्तव्यानि। पुष्यस्य स्वामी देवता गुरुरस्ति। गुरोः कार्यं ज्ञान ज्ञानप्रदान शुभकार्यसम्पादनञ्च अतः पुष्येऽपि विद्याध्ययनं शुभाकार्याणि च सम्पाद्यन्ते। इत्थं प्रत्येकं देवस्य यन्नक्षत्रं तस्मिन्नक्षत्रे देवानुरूपं कार्यानाचरणीयं किञ्च कार्यानुरूपं तेषां नक्षत्रानां संज्ञा। यथा प्रत्येकं नक्षत्रस्य स्वामी कश्चन् देवता तथैव प्रत्येकस्य मुहूर्त्तस्य तिथेश्च स्वामी देवः निर्धारितोऽस्ति। यदि वयं सूक्ष्मतया पश्यामश्चेत् ज्ञातुं शक्यते यत् पञ्चदशमुहूर्तानां ये स्वामिनः देवाः तेषु प्रत्येकं कस्यचिन्नक्षत्रस्य स्वामी भवति। यानि कार्याणि यस्मिन् नक्षत्रे करणीयानि तानि तस्मिन् मुहूर्त्तेऽपि कर्तुं शक्यते। यतः तयोः नक्षत्र-मुहूर्त्तयोः स्वामी एक-एव देवः। यथा मूलनक्षत्रं तीक्ष्णसंज्ञकं तस्य स्वामी राक्षसः। तस्मिन् मूलनक्षत्रे तीक्ष्णकार्याणि घात-पशुदमनादीनि क्रियन्ते। एतान्येव कार्याणि राक्षससंज्ञके मुहूर्तेऽपि कर्तुं शक्यते। भवतः सम्यगवबोधाय। अत्र नक्षत्र मुहूर्त-तिथिदेवतानाबोधकं चक्रं प्रदर्श्यते -

क्र. सं.	नक्षत्रम्	देवता	मुहूर्त्तः	तिथयः
१	अश्विनी	अश्विनीकुमारौ		दशमी (अन्तकः)
२	भरणी	यमः		
३	कृत्तिका	अग्निः		प्रतिपदा (वह्निः)
४	रोहिणी	ब्रह्मा	8.विरञ्चिः 9. ब्रह्मा	द्वितीया (ब्रह्मा)
५	मृगशिरा	चन्द्रमा	11.इन्दुः	अमा./पूर्णिमा (चन्द्रमा)
६	आर्द्रा	रूद्रः (शिवः)	1. शिवः	अष्टमी (शिवः) चतुर्दशी (शिवः)
७	पुनर्वसु	अदितिः		
८	पुष्य	गुरुः		
९	आश्लेषा	सर्पः	2. भुजङ्गः	पञ्चमी (अहिः)
१०	मघा	पितरः	4. पित्र्यः	अमावस्या (पितरः)
११	पू.फा.	भगः(योनिः)	15 योनिः	
१२	उ.फा.	अर्यमा	14 अर्यमा	
१३	हस्त	सूर्यः		सप्तमी (रविः)
१४	चित्रा	त्वष्टा		
१५	स्वाती	वायुः		
१६	विशाखा	इन्द्राग्निः	10 इन्द्राग्निः	
१७	अनुराधा	मित्रः	3 मित्रः	
१८	ज्येष्ठा	इन्द्रः		
१९	मूल	राक्षसः	12 राक्षसः	
२०	पू.षा.	जलम्	6 जलम्	
२१	उ.षा.	विश्वदेवः	6 विश्वः	एकादशी (विश्व)
२२	अभिजित्	ब्रह्मा	7 विरञ्चिः 9. ब्रह्मा	द्वितीया (ब्रह्मा)
२३	श्रवण	विष्णुः		द्वादशी (विष्णुः)
२४	धनिष्ठा	वसुः	5 वसुः	
२५	शतभिषा	वरुणः	वरुणः	
२६	पू.भा.	अजैकपाद्		
२७	उ.भा.	अहिर्बुध्न्यः		
२८	रेवती	पूषा		

३.४ मुहूर्त्तसम्बन्धिविषयाः

कालक्रमेण एते मुहूर्त्ताः व्यवहारे अप्रयुक्ताः सञ्जाताः। कालान्तरेण मुहूर्त्त इति शब्दः कर्मानुकूलकालवाचकः शुभकालवाचको वा जातः। अत एव विविधकार्येभ्यः बहवः मुहूर्त्ताः व्यवहारे प्रयुक्ताः। तद्यथा - कृषिकर्ममुहूर्त्तः, व्यापारमुहूर्त्तः, गृहप्रवेशमुहूर्त्तः, यात्रामुहूर्त्तः, विवाहादिसंस्कारमुहूर्त्ताः इत्यादि। एवञ्च अस्य विवेचनं संहितास्कन्धस्य यस्मिन् विभागे भवति तस्य नाम मुहूर्त्तविज्ञानम् इति। अतः मुहूर्त्तविज्ञाने अथवा मुहूर्त्तसम्बन्धिग्रन्थेषु

© राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१४

शुभाशुभकालज्ञानस्य एव विषयाः निरूपिताः वर्तन्ते। मुहूर्त्तनिर्धारणे तिथि-वार-नक्षत्र-योग-करणानि एतानि पञ्च अङ्गानि प्रमुखानि सन्ति। अतः मुहूर्त्तसम्बन्धिग्रन्थेषु एतेषां पञ्चाङ्गानां वर्णनं मिलत्येव।

बोधप्रश्नाः

१. मुहूर्त्तस्य परिभाषा देया।

.....

.....

२. एकस्मिन् अहनि कति मुहूर्ताः भवन्ति?

.....

.....

३. एकस्य मुहूर्त्तस्य मानम् कति घट्यात्मकं भवति?

.....

.....

४. वराहमिहिरमते प्रथममुहूर्त्तस्य नाम किम्?

.....

.....

५. मृगशिरानक्षत्रे यत्कार्यं निर्दिष्टं तत् कस्मिन् मुहूर्त्ते कर्तुं शक्यते?

.....

.....

३.५ मुहूर्त्तज्ञानस्य आवश्यकता

यथा अकाले कृतं भोजनं विषसमं भवति तथैव अकाले कृतानि श्रौत-स्मार्त्तादिकर्माणि विपरीतफलं यच्छन्ति। अतः कदा कस्य कार्यस्य करणेन तस्य कार्यस्य फलं प्राप्स्यति तथा तस्मिन् कार्ये अनिष्टं न भविष्यति इति निर्णयार्थं मुहूर्त्तज्ञानस्य महती आवश्यकता भवति। अधोलिखिताभ्यां द्वाभ्यां विषयाभ्यां भवान् मुहूर्त्तस्य आवश्यकतां ज्ञास्यति।

१. मुहूर्त्तस्य महत्त्वं

२. मुहूर्त्तदोषस्य दुष्परिणामः

३.५.१ मुहूर्त्तस्य महत्त्वं

यज्ञादीनां कृते मुहूर्त्तस्य आवश्यकता भवत्येव। लोकव्यवहारे विविध कार्याणां सम्पादनाय मुहूर्त्तस्य आवश्यकता भवति। कः न इच्छति स्वकार्ये साफल्यम् उत कः इच्छति स्वकार्ये विघ्नताम्? अर्थात् कोऽपि न। अतः कार्यस्य करणात् पूर्वं मुहूर्त्तस्य ज्ञानम् आवश्यकम्।

अनुकूले काले कृते सति कार्यसाफल्यं भवति अन्यथा वैपरीत्यं फलम् अनुभूयते। भवता पूर्वमेन पठिता विविधाः शिवादिमुहूर्त्ताः। वस्तुतः तत्तद्देवानुगुणं कार्यं

तेषु-तेषु मुहूर्त्तेषु सम्पाद्यते चेत् तत्कार्यं साफल्यं भजते। तथैव उग्रनक्षत्रेषु उग्रकार्याणि, मित्रनक्षत्रेषु तदनुरूपकार्याणि विधेयानि। एतदेव सुविचार्य नक्षत्रादिष्वाधारितस्य कालविशेषस्य मुहूर्त्त इति संज्ञां कृत्वा तत्तन्मुहूर्त्ते क्रियमाणस्य कार्यविशेषस्य निर्धारणम् अकारि मौहूर्त्तिकैः दैवज्ञैः। येन नित्यनैमित्तिकादिकार्यप्रवर्तनाय एते मुहूर्त्ता अत्युपयोगिनः।

अधुनाऽपि आजन्म मृत्युपर्यन्तं विविधसंस्कारादिषु लोके मुहूर्त्तस्य प्रयोगः दृश्यते। गृहारम्भ - गृहप्रवेश-कृषिकर्म-विविध संस्कारादयः शुभमुहूर्त्तेषु यदि सम्पाद्यन्ते तर्हि साफल्यं दृश्यते। विवाहसंस्कारः शुभमुहूर्त्ते विधेयः येन न केवलं विवाहककर्म निर्विघ्नतया समापयेत् अपितु वैवाहिकजीवनमपि सुखप्रदं स्यात्। मुहूर्त्त चिन्तामणिकारः आचार्यः श्रीरामदैवज्ञोऽपि वक्ति -

भार्या त्रिवर्गकरणं शुभशीलयुक्ता
शीलं शुभं भवति लग्नवशेन तस्याः।
तस्माद्विवाहसमयः परिचिन्त्यते हि
तन्निघ्नतामुपगता सुतशीलधर्माः॥

पदच्छेदः

भार्या/ त्रिवर्ग/ करणं/ शुभ/ शील/ युक्ता/ शीलं / शुभं/ भवति/ लग्न/ वशेन/ तस्याः/ तस्मात्/ विवाह / समयः/ परिचिन्त्यते हि / तन्निघ्नताम्/ उपगता/ सुत/ शील/ धर्माः।

अन्वयः

शुभशीलयुक्ता भार्या त्रिवर्गकरणं भवति। तस्याः लग्नवशेन शीलं शुभं भवति, हि तन्निघ्नताम् उपगता सुतशीलधर्माः तस्मात् विवाहसमयः परिचिन्त्यते।

प्रतिपदार्थः

शुभं = पत्यै अनुकूलं कल्याणकरञ्च, शीलः = स्वभावः तेन शुभशीलेन युक्ता भार्या = पत्नी, त्रिवर्गकरणं = धर्मार्थकामेतिवर्ग त्रय सम्पादने अत्यावश्यका परमसहायिका भवति। तस्याः लग्नवशेन = शुभलग्नेन, शीलं = आचरणम्, शुभं = अनुकूलं, भवति = जायते। हि = यतोहि, तन्निघ्नतामुपगता = अनुकूलसमये विवाहमुहूर्त्ते विवाहसम्पादनात्, सुतशीलधर्माः = उक्तं सुतशीलधर्मगुणोपेता, तस्मात् = अतः विवाहसमयः = विवाहस्य कृते उपयुक्तकालः, परिचिन्त्यते = विचार्यते।

व्याख्या

विवाहकाले शुभमुहूर्त्तस्य आवश्यकतां प्रतिपादयन् वदति आचार्यः -

शुभशीलयुक्ता भार्या पत्यै धर्म-अर्थ-कामेतित्रिविधपुरुषार्थदायिका भवति। पत्न्याः शुभशीलादिगुणाः विवाहस्य शुभलग्नवशादेव प्राप्यते। यतो हि विवाहमुहूर्त्ताधीनाः सुत-शील- धर्मादिगुणाः भवन्ति। अतः विवाहस्य शुभलग्नादिमुहूर्त्तः विचार्यते।

इत्थमुपरोक्त विवेचनात् ज्ञायते यत् कश्चिदपिकार्ये मुहूर्त्तविचारस्य आवश्यकता भवत्येव।

३.५.२ मुहूर्त्तदोषस्य दुष्परिणामः

आधुनिके तीव्रगामिने युगे प्रायशः बहवो जनाः मुहूर्त्ततत्वाविवेकिनः प्रमादवशात् मुहूर्त्तस्य महत्त्वं नाङ्गीकुर्वन्ति। तेषां कथनं भवति यत् समयाभावात् अभीष्टमुहूर्त्तस्य प्रतीक्षां

© राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१४

मास्त्वीति। परन्तु इदमपि दृश्यते यत् मुहूर्त्तं विना ये कार्यं कुर्वन्ति तेषां कार्ये विघ्नमायात्येव, दुर्मुहूर्त्ते यदि यात्रा क्रियते तर्हि तस्यां यात्रायां कष्टम्। मुहूर्त्तं विना व्यापारस्य आरम्भं कुर्वन्ति तदा व्यापारे हानिः, वाहनस्य क्रयं कुर्वन्ति तर्हि दुर्घटनादिकं तथा च मुहूर्त्तं विना यदि मङ्गलकार्यमाचरन्ति तदा तस्मिन् कर्मण्यपि अमङ्गलता दृश्यते।

अतः प्रत्येकेऽस्मिन् कर्मणि शुभमुहूर्त्तस्य विचारं कृत्वैव कार्यं सम्पादनीयम्। तदैव कार्यं सफलं भवति।

३.६ मुहूर्त्तग्रन्थाः

पुरा मुहूर्त्तविषयाः संहिताग्रन्थेषु एव समाहिता आसन्। परन्तु मुहूर्त्तविज्ञानस्य उपयोगबाहुल्यात् अत्यावश्यकता तस्य वैशिष्ट्यं च दृष्ट्वा कालान्तरेण मुहूर्त्तसम्बन्धि-स्वतन्त्रग्रन्थानाम् अपि रचना जाता। इदानीं मुहूर्त्तसम्बद्धाः बहवः ग्रन्था उपलब्धाः सन्ति तेषु केचन् महत्त्वपूर्णं तथा अत्यधिकप्रचलितानां मुहूर्त्तग्रन्थानां नामानि दीयन्ते–

१. **रत्नकोशः**– आचार्यलल्लेन निर्मितोऽयं रत्नकोशसंज्ञकः मुहूर्त्तसम्बन्धिग्रन्थ एव। अस्य ग्रन्थस्य रचना संभवतः ५६० शकाब्दे अभवत् इति कथ्यन्ते। अस्य ग्रन्थस्य विषये अत्यधिकं न किमपि ज्ञातम्। वर्तमानकाले ग्रन्थोऽयं प्रायः अलभ्यमाणः। परन्तु प्रसिद्धं यत् ग्रन्थममुमाधारीकृत्य एव श्रीपतिमिश्रेण रत्नमालानामकग्रन्थः रचितः।

२. **रत्नमाला**– ग्रन्थोऽयं आचार्यश्रीपतिमिश्रेण ९६१ मिते शकाब्दे रचितः। रत्नमालाग्रन्थस्य माधवेन टीका ११८५ शकाब्दे कृता।

३. **राजमार्त्तण्डः**– भोजकृतोऽयं ग्रन्थः ९६४ मित शकाब्दमभितः प्रणीतः इति कथ्यते। भोजस्य इतोऽप्येकः विद्वज्जनवल्लभाख्यः ग्रन्थः अस्ति मुहूर्त्तविषयकम् इति।

४. **ज्योतिर्विदाभरणम्**– कालिदासदैवज्ञेन ज्योतिर्विदाभरणम् ११६४ मिते शके विरचितम्।

५. **विवाह वृन्दावनम्**– विवाहसंस्कारस्य मुहूर्त्तादिकं विचारणार्थं केशवदैवज्ञेन ११६५ शकाब्दे विवाहवृन्दावनम् इत्याख्यस्य ग्रन्थस्य रचना जाता। अयं हि केशवदैवज्ञः केशवीजातकपद्धतेः रचनाकारात् केशवात् भिन्नोऽस्ति इति विदुषां मतम्।

६. **विवाहपटलः**– विवाहसम्बन्धिमुहूर्त्तस्य विचारार्थम् अयम् विवाहपटलाख्यः ग्रन्थः। विवाहपटलम् इति नाम्ना ग्रन्थद्वयं वर्तते। एकः शार्ङ्गधरप्रणीतः १४०० शकाब्दमभितः रचितः। अपरस्तु १४४४ मिते शकाब्दे रचितः पीताम्बरकृतः। पीताम्बरकृतविवाहपटलस्य ग्रन्थकारेनैव १४४६ मिते शकाब्दे निर्णयामृतटीका कृता।

७. **मुहूर्त्तमार्त्तण्डः**– अनन्तदैवज्ञस्य पुत्रः श्रीमन्नारायणदैवज्ञः अस्ति अस्य मुहूर्त्तमार्तण्डस्य रचनाकारः। तेन हि ग्रन्थोऽयं १४९३ मिते शकाब्दे (१५७१ ई.) रचितः। ग्रन्थेऽस्मिन् दश प्रकरणानि तथा च भिन्न-भिन्न छन्दैः षष्ट्योत्तरशतपदानि (१६०) सन्ति।

८. **तोडरानन्दः**– ग्रन्थोऽयं संङ्कलनात्मकः अस्ति। नीलकण्ठदैवज्ञेन १५०९ मिते शकाब्दे (१६८७ई.) संकलितः। अस्मिन् ग्रन्थे चण्डेश्वर-पवनेश्वर-दूर्गादित्यादि दैवज्ञानां मतानि तथा च दैवज्ञमनोहर- व्यवहारसमुच्चय कल्पलतेत्यादिग्रन्थेभ्यः विषयाः संकलिताः सन्ति।

९. **मुहूर्तचिन्तामणिः**– अनन्तदैवज्ञस्य आत्मजेन श्रीमद्रामदैवज्ञेन विरचितोऽयम् मुहूर्तचिन्तामणिः मुहूर्तशास्त्रीयग्रन्थेषु सर्वोत्तमः अस्ति। ग्रन्थोऽयम् १५२२ शकाब्दे (१६००ई.)

विरचितः। वर्तमानकाले अस्य मुहूर्त्तग्रन्थस्य बहुप्रचारः अस्ति। दृश्यतेदम् यत् प्रायः सर्वेषामेव ज्योतिषोपासकानां गृहे मुहूर्त्तचिन्तामणिः भवतीत्यनेन अस्य सर्वमान्यत्वं प्रकटयति। अस्य ग्रन्थस्य प्रतिमाक्षरा- टीका अपि अनेन रामदैवज्ञेनैव कृतम् अस्ति। परन्तु अस्य ग्रन्थस्य गोविन्ददैवज्ञकृता पीयूषधारा टीका अति प्रसिद्धा सुमनोहरा च।

अन्ये मुहूर्त्तग्रन्थाः सन्ति यथा -

मुहूर्त्तचूडामणिः	शिवदैवज्ञः	(१५४० शक, १६१८ ई)
मुहूर्त्तकल्पद्रुमः	विट्ठलदीक्षितः	(१६२७ई.)
मुहूर्त्तमाला	रघुनाथदीक्षितः	(१६६०ई.)
मुहूर्त्तदीपकः	महादेवः	(१६६१ई.)
मुहूर्त्तगणपतिः	गणपतिः	(१६८५ई.)
मुहूर्त्तसिन्धुः	गङ्गाधरशास्त्री	(१८८३ई.) इत्यादयः।

३.७ मुहूर्त्तग्रन्थेषूत्तमा मुहूर्त्तचिन्तामणिः

सन्ति बहवः मुहूर्त्तसम्बन्धिताः ग्रन्थाः परन्तु सर्वेष्वपि ग्रन्थेषु मुहूर्त्तचिन्तामणिग्रन्थः सर्वोत्कृष्टं स्थानं भजते। ग्रन्थेऽस्मिन् त्रयोदश प्रकरणानि सन्ति। अस्मिन् ग्रन्थे विविधमुहूर्त्तानां सुव्यवस्थितं वर्णनम् अस्ति। ग्रन्थस्य द्वितीये श्लोके दैवज्ञेन अस्य ग्रन्थस्य वैशिष्ट्यं निरूपितं वर्तते। संक्षिप्तसारार्थविलासगर्भयुक्तोऽयम् ग्रन्थः रामदैवज्ञेन रचितः। ग्रन्थस्यास्य प्रसिद्धे द्वे टीके वर्तेते। एका तु रामदैवज्ञेनैवकृता प्रतिमाक्षराटीका एव। अपरा तु रामदैवज्ञस्य भ्रातुश्पुत्रेण गोविन्ददैवज्ञेन कृता पीयूषधाराटीका।

बोधप्रश्नाः

६. भार्या त्रिवर्गकरणम् इत्यत्र के त्रयः वर्गाः?

.....

.....

७. शुभशीलयुक्ता भार्या कदा भवति?

.....

.....

८. रत्नमाला कस्य रचना अस्ति।

.....

.....

९. विवाहपटलस्य निर्णयामृतटीका केन कारिता?

.....

.....

१०. संकलनग्रन्थो वर्तते -

१. विवाहपटलम् २. राजमार्त्तण्डः ३. तोडरानन्दः ४. मुहूर्तमाला

© राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१४

११. मुहूर्त्तचूडामणिः कस्य रचना अस्ति?

.....

.....

३.८ सारांशः

अयम् तृतीयः पाठः मुहूर्त्तपदाध्यायेति नाम्ना निरूपितासीत्। पाठेऽस्मिन् मुहूर्त्तसम्बन्धि प्रारम्भिकवर्णनं कृतं यथा – मुहूर्त्तपदम्, तस्य परिभाषा, मुहूर्त्तानां नामानि, तस्यावश्यकतेत्यादीनां वर्णनं कृतम्।

अस्य तृतीये पाठ्यांशे अह्नः तथा रात्रेः पञ्चदशमुहूर्त्तानां नामानि उद्धृतानि तत्र च वराहमिहिरस्य मते मुहूर्त्तानां नामानि तेषां स्वामिनामानुसारमेव निहितम्। वराहमिहिरानुसारेण नक्षत्रेषु विहितकार्याणि तन्नक्षत्राधिपतेः मुहूर्त्तेऽपि कर्त्तुं शक्यते। तस्य सारणीद्वारा निरूपणं कृतम्। चतुर्थपञ्चमपाठ्यांशयोः मुहूर्त्तग्रन्थेषु निहितविषयाणां वर्णनं पुनश्च मुहूर्त्तस्य लोके किम्महत्त्वम् अस्ति, दुर्मुहूर्त्ते कृते सति किं दुष्परिणामं भवति इति निरूपितम्।

षष्ठे पाठ्यांशे विविधमुहूर्त्तग्रन्थानां तेषां रचनाकाराणां च वर्णनं दत्तम्। सप्तमे पाठ्यांशे भवता पठितं यत् मुहूर्त्तग्रन्थेषु मणिवत् शोभायमानः मुहूर्त्तचिन्तामणिग्रन्थः आचार्यरामदैवज्ञेन रचितः सॅक्षिप्तसारार्थविलासगर्भः सुललितपद्यान्वितः वर्तते।

३.९ शब्दावली

१. अह्नः = दिनस्य।

२. मुहूर्त्तः = द्विघटिकात्मकः कालः।

३. त्रिवर्गः = त्रयः पुरुषार्थाः (धर्मार्थकामाः)।

४. दुर्मुहूर्त्तः = अशुभमुहूर्त्तः।

३.१० सन्दर्भग्रन्थः

१. मुहूर्त्तचिन्तामणिः (प्रतिमाक्षरा टीका), चौखम्भासंस्कृतसंस्थान, वाराणसी।

३.११ सहायकग्रन्थाः

१. भारतीय ज्योतिषशास्त्रेतिहासः (लोकमणिदाहाल), चौखम्भासुरभारतीप्रकाशन, वाराणसी।

२. बृहत्संहिता, भट्टोत्पलटीकासहिता, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी।

३.१२ बोधप्रश्नोत्तराणि

१. कस्यचित् कार्यस्य कृते उपयुक्तः शुभकालः मुहूर्त्तः।

२. एकस्मिन् अहिन पञ्चदशमुहूर्त्ताः भवन्ति।

३. एकस्य मुहूर्त्तस्य मानं द्विघट्यात्मकं भवति।

४. शिवः प्रथमः मुहूर्त्तः।

५. मृगशिरानक्षत्रस्य कार्यं एकादशे इन्दुमुहूर्त्ते कर्त्तुं शक्यते।

६. धर्म-अर्थ-कामाः।

७. शुभलग्ने (मुहूर्त्ते) विवाहात्।

८. श्रीपतिमिश्रस्य।

९. पीताम्बरेण।

१०. तोडरानन्दः।

११. शिवदैवज्ञस्य।

३.१३ अभ्यासप्रश्नाः

१. वराहमिहिरोक्ताः पञ्चदशमुहूर्त्ताः के?

२. भवतः गृहे केषु-केषु कार्येषु मुहूर्त्तविचारः क्रियते? निरूप्यताम्।

३. केषां नक्षत्राणां स्वामिनः मुहूर्त्ताधिपतयः अपि सन्ति? के च ते?

४. विवाहकाले शुभलग्नविचारस्य का आवश्यकता?

५. सुमेलनीयम्–

१.	मुहूर्त्तमार्तण्डः	भोजः
२.	मुहूर्त्तचूडामणिः	महादेवः
३.	मुहूर्त्तसिन्धुः	शिवदैवज्ञः
४.	मुहूर्त्तदीपकः	नारायणदैवज्ञः
५.	राजमार्त्तण्डः	गङ्गाधरशास्त्री

© राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१४

११. मुहूर्त्तचूडामणिः कस्य रचना अस्ति?

.....

.....

३.८ सारांशः

अयम् तृतीयः पाठः मुहूर्त्तपदाध्यायेति नाम्ना निरूपितासीत्। पाठेऽस्मिन् मुहूर्त्तसम्बन्धि प्रारम्भिकवर्णनं कृतं यथा – मुहूर्त्तपदम्, तस्य परिभाषा, मुहूर्त्तानां नामानि, तस्यावश्यकतेत्यादीनां वर्णनं कृतम्।

अस्य तृतीये पाठ्यांशे अह्नः तथा रात्रेः पञ्चदशमुहूर्त्तानां नामानि उद्धृतानि तत्र च वराहमिहिरस्य मते मुहूर्त्तानां नामानि तेषां स्वामिनामानुसारमेव निहितम्। वराहमिहिरानुसारेण नक्षत्रेषु विहितकार्याणि तन्नक्षत्राधिपतेः मुहूर्त्तेऽपि कर्त्तुं शक्यते। तस्य सारणीद्वारा निरूपणं कृतम्। चतुर्थपञ्चमपाठ्यांशयोः मुहूर्त्तग्रन्थेषु निहितविषयाणां वर्णनं पुनश्च मुहूर्त्तस्य लोके किम्महत्त्वम् अस्ति, दुर्मुहूर्त्ते कृते सति किं दुष्परिणामं भवति इति निरूपितम्।

षष्ठे पाठ्यांशे विविधमुहूर्त्तग्रन्थानां तेषां रचनाकाराणां च वर्णनं दत्तम्। सप्तमे पाठ्यांशे भवता पठितं यत् मुहूर्त्तग्रन्थेषु मणिवत् शोभायमानः मुहूर्त्तचिन्तामणिग्रन्थः आचार्यरामदैवज्ञेन रचितः संक्षिप्तसारार्थविलासगर्भः सुललितपद्यान्वितः वर्तते।

३.९ शब्दावली

१. अह्नः = दिनस्य।

२. मुहूर्त्तः = द्विघटिकात्मकः कालः।

३. त्रिवर्गः = त्रयः पुरुषार्थाः (धर्मार्थकामाः)।

४. दुर्मुहूर्त्तः = अशुभमुहूर्त्तः।

३.१० सन्दर्भग्रन्थः

१. मुहूर्त्तचिन्तामणिः (प्रतिमाक्षरा टीका), चौखम्भासंस्कृतसंस्थान, वाराणसी।

३.११ सहायकग्रन्थाः

१. भारतीय ज्योतिषशास्त्रेतिहासः (लोकमणिदाहाल), चौखम्भासुरभारतीप्रकाशन, वाराणसी।

२. बृहत्संहिता, भट्टोत्पलटीकासहिता, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी।

३.१२ बोधप्रश्नोत्तराणि

१. कस्यचित् कार्यस्य कृते उपयुक्तः शुभकालः मुहूर्त्तः।

२. एकस्मिन् अह्नि पञ्चदशमुहूर्त्ताः भवन्ति।

३. एकस्य मुहूर्त्तस्य मानं द्विघट्यात्मकं भवति।

४. शिवः प्रथमः मुहूर्त्तः।

५. मृगशिरानक्षत्रस्य कार्यं एकादशे इन्दुमुहूर्त्ते कर्त्तुं शक्यते।

६. धर्म-अर्थ-कामाः।

७. शुभलग्ने (मुहूर्त्ते) विवाहात्।

८. श्रीपतिमिश्रस्य।

९. पीताम्बरेण।

१०. तोडरानन्दः।

११. शिवदैवज्ञस्य।

३.१३ अभ्यासप्रश्नाः

१. वराहमिहिरोक्ताः पञ्चदशमुहूर्त्ताः के?

२. भवतः गृहे केषु-केषु कार्येषु मुहूर्त्तविचारः क्रियते? निरूप्यताम्।

३. केषां नक्षत्राणां स्वामिनः मुहूर्त्ताधिपतयः अपि सन्ति? के च ते?

४. विवाहकाले शुभलग्नविचारस्य का आवश्यकता?

५. सुमेलनीयम्–

१.	मुहूर्त्तमार्तण्डः	भोजः
२.	मुहूर्त्तचूडामणिः	महादेवः
३.	मुहूर्त्तसिन्धुः	शिवदैवज्ञः
४.	मुहूर्त्तदीपकः	नारायणदैवज्ञः
५.	राजमार्त्तण्डः	गङ्गाधरशास्त्री

© राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१४

चतुर्थः पाठः (ग्रन्थपरिचयाध्यायः)

पाठसंरचना

४.१ प्रस्तावना
४.२ उद्देश्यम्
४.३ मुहूर्त्तचिन्तामणिग्रन्थपरिचयः
४.३.१ मुहूर्त्तचिन्तामणिग्रन्थस्य प्रयोजनम्
४.३.२ मुहूर्त्तचिन्तामणिग्रन्थस्य वैशिष्ट्यं
४.४ मुहूर्त्तचिन्तामणौ वर्ण्यविषयाः
४.४.१ शुभाशुभप्रकरणे वर्ण्यविषयाः
४.४.२ नक्षत्रप्रकरणे वर्ण्यविषयाः
४.४.३ संक्रान्तिप्रकरणे वर्ण्यविषयाः
४.४.४ गोचरप्रकरणे वर्ण्यविषयाः
बोधप्रश्नाः
४.५ मुहूर्त्तचिन्तामणौ संस्कारसम्बन्धितानि प्रकरणानि
४.५.१ संस्कारप्रकरणे वर्ण्यविषयाः
४.५.२ विवाहप्रकरणे वर्ण्यविषयाः
४.५.३ वधूप्रवेशप्रकरणे वर्ण्यविषयाः
४.५.४ द्विरागमनप्रकरणे वर्ण्यविषयाः
४.५.५ अग्न्याधानप्रकरणे वर्ण्यविषयाः
४.५.६ राज्याभिषेकप्रकरणे वर्ण्यविषयाः
४.६ यात्रासम्बन्धितः प्रकरणस्तत्र वर्ण्यविषयाः
४.७ वास्तुप्रकरणे वर्ण्यविषयाः
४.७.१ गृहारम्भ-निर्माणे वर्ण्यविषयाः
४.७.२ गृहप्रवेशप्रकरणे वर्ण्यविषयाः
बोधप्रश्नाः
४.८ ग्रन्थकर्त्तुः परिचयः
४.९ सारांशः
४.१० शब्दावली
४.११ सन्दर्भग्रन्थाः
४.१२ सहायकग्रन्थाः
४.१३ बोधप्रश्नोत्तराणि
४.१४ अभ्यासप्रश्नाः

४.१ प्रस्तावना

एतत् पूर्वं भवता मुहूर्त्तशास्त्रविषये पठितम्। तत्र मुहूर्त्तशब्दस्य ज्ञानपूर्वकं मुहूर्त्तशास्त्रस्योपयोगित्वं मुहूर्त्तोपेक्षायाः दुष्परिणामं च ज्ञातम्। मुहूर्त्तशास्त्राध्ययनस्यावश्यकता, तत्सम्बन्धिविविधग्रन्थानां परिचयः प्राप्तः। पाठेऽस्मिन् मुहूर्त्तचिन्तामणिग्रन्थस्य विस्तरेण परिचयः प्राप्यते। तस्मिन् मुहूर्त्तचिन्तामणिग्रन्थस्य परिचयः, तस्य वैशिष्ट्यम्, मुहूर्त्तचिन्तामणिग्रन्थस्य प्रकरणानि तेषु वर्ण्यविषयांश्च भवान् पठिष्यति। अस्य पाठस्यान्ते भवान् मुहूर्त्तचिन्तामणि ग्रन्थकर्त्तुः आचार्यरामदैवज्ञस्य विषयेऽपि ज्ञास्यति।

४.२ उद्देश्यम्

- मुहूर्त्तचिन्तामणिग्रन्थस्य परिचयं प्राप्स्यति।
- मुहूर्त्तचिन्तामणिग्रन्थे कति प्रकरणानि सन्ति इति वक्तुं शक्ष्यति।
- विविधप्रकरणेषु वर्णितानां विषयाणां निरूपणं कर्त्तुं शक्ष्यति।
- मुहूर्त्तचिन्तामणिग्रन्थकारस्य परिचयं ज्ञातुम् शक्ष्यति।

४.३ मुहूर्त्तचिन्तामणिग्रन्थपरिचयः

भवता गते पाठे एव पठितं यत् अयं मुहूर्त्तचिन्तामणिग्रन्थः मुहूर्त्तशास्त्रस्य अतिमहत्त्वपूर्णग्रन्थः अस्ति। श्रीरामदैवज्ञेन विरचितोऽयं ग्रन्थः प्रामाणिकः सर्वमान्यश्च वर्तते। अस्य ग्रन्थस्य रचना १५२२ मिते शकाब्दे (१६०० ईशवीये) अभवत्। अयं कालः ज्योतिषशास्त्रस्य सिद्धान्तकालः आसीत्। यद्यपि मुहूर्त्तचिन्तामणेः प्राक् मुहूर्त्तग्रन्थाः आसन्। मुहूर्त्तमार्तण्डः रामदैवज्ञभ्रात्रा नारायणदैवज्ञेन १४९३ मिते शकाब्दे (१५७१ ई.) प्रणीतः आसीत्। किन्तु मूहूर्त्तचिन्तामणिवत् न कोऽपि अन्यः ग्रन्थः समादृतः प्रथितश्च। अन्येषु ग्रन्थेषु सत्स्वपि अस्य मुहूर्त्तचिन्तामणि ग्रन्थस्य प्रयोजनं स्वकृत प्रमिताक्षराटीकायां निरूपितमनेन–

४.३.१ मुहूर्त्तचिन्तामणिग्रन्थस्यप्रयोजनम्

मुहूर्त्तचिन्तामणौ द्वितीये श्लोके ग्रन्थस्य प्रयोजनं निरूपयति यत् क्रियाकलाप-प्रतिपत्तिहेतुम्' इति अर्थात् नित्य-नैमित्तिक-संस्कारसम्बद्धाः सर्वा अपि क्रियाः तासां कलापः= समूहः तत्प्रतिपत्तिः = ज्ञानं प्रवृत्तिनिवृत्तिविषयकं तस्मिन् ज्ञाने हेतुभूतः मुहूर्त्तचिन्तामणिरित्याख्यः ग्रन्थः।

अर्थात् कस्यचित् कार्यस्य विधानं कदा भवेत्? कदा तस्य आरम्भः समाप्तिश्च कार्यः? इत्यादि ज्ञानस्य हेतुः साधकः अयं ग्रन्थः। अस्य ग्रन्थस्य अध्ययनेन कार्यविशेषस्य अनुकूल-प्रतिकूलकालं ज्ञातुं शक्नोति मानवः।

४.३.२ मुहूर्त्तचिन्तामणिग्रन्थस्य वैशिष्ट्यम्

मुहूर्त्तचिन्तामणिग्रन्थस्य वैशिष्ट्यं तु तस्य ग्रन्थस्य रचनायाः आवश्यकतां पठित्वा एव अवबोधः जातः। मुहूर्त्तानां साङ्गोपाङ्गवर्णनात् अयं मुहूर्त्तशास्त्रस्य आकरग्रन्थोऽस्ति। अन्येषु मुहूर्त्तग्रन्थेषु तथा विस्तरेण विषयाणां प्रतिपादनं नास्ति यथा ग्रन्थेऽस्मिन् वर्तते। मुहूर्त्तचिन्तामणौ संङ्क्रान्ति –गोचरप्रकरणयोः अतिविशदतया अथ च पीयूषाधारायां समीक्षात्मकं वर्णनं कृतं विद्यते। कस्यचित् शुभाशुभमुहूर्त्तस्य प्रवृत्तिः सार्वत्रिका कस्यचित् देशेविशेष एव भवति। मुहूर्त्तचिन्तामणिकारेण शुभाशुभप्रकरणे समेषां शुभाशुभमुहूर्त्तानां कुत्र च प्रवृत्तिः कुत्र च निवृत्तिः इति सम्यक्तया उपस्थापितम्। षोडशसंस्काराणामपि निश्शेषमौहूर्त्तिक विचारः ग्रन्थेऽस्मिन् उपलभ्यते। स्थले-स्थले महत्वपूर्णविषयाणां वर्णने मुहूर्त्तेतरविभागीयविषयाः अपि उपस्थापिताः। यथा विवाहसंस्कारमुहूर्त्तवर्णने माङ्गलिकदोष-विवाहकाल-विवाहनिमित्तप्रश्नानामपि सम्यक्तया उपस्थापनम् अकारि। धर्मशास्त्र-ज्योतिष- नीतिसम्बन्धितानां विषयाणाम् एकत्र संकलनम् दृश्यतेऽस्मिन् ग्रन्थे। अस्य ग्रन्थस्य श्लोकेषु काव्यसौन्दर्यं, छन्दवैचित्र्यमपि वर्तते।

४.४ मुहूर्त्तचिन्तामणौ वर्ण्यविषयाः

मुहूर्त्तचिन्तामणिः मुहूर्त्तप्रतिपादकग्रन्थः अस्ति अतः ग्रन्थेऽस्मिन् विविधकार्याणां कृते

© राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१४

मुहूर्त्तसम्बन्धिविषयाः विवेचिताः दृश्यन्ते। ग्रन्थेऽस्मिन् त्रयोदश प्रकरणानि सन्ति।

४.४.१ शुभाशुभप्रकरणे वर्ण्यविषयाः

मुहूर्त्तचिन्तामणिग्रन्थस्य प्रथमप्रकरणम् शुभाशुभप्रकरणम् अस्ति। अस्मिन्प्रकरणे मङ्गलाचरणानन्तरं अस्य ग्रन्थस्य प्रयोजनं निरूपितम्। तदनन्तरं तिथीनां संज्ञा, स्वामिनश्च, क्रकचादियोगाः, दग्ध-विष-हुताश-यमघण्टयोगाः, मासशून्यनक्षत्रादयः, आनन्दादियोगाः, ध्वंक्षाद्यशुभेषु योगेषु वर्ज्यकालः, पक्षरन्ध्रतिथयः, कुलिक- कालवेला-यमघण्टाद्यशुभमुहूर्त्ताः, होलिकाष्टकज्ञानम्, विविधकर्मणि भद्राविचारः गुरु-शुक्रास्तादिविचारः, सिंहस्थगुरुदोषः तत्परिहारश्च, लुप्तसंवत्सरजन्यदोषाः, कालहोरा-वारप्रवृत्तिः तत्प्रयोजनम्, मन्वादि-युगादि-तिथीनां वर्णनम् अस्मिन् शुभाशुभप्रकरणे वर्तते।

४.४.२ नक्षत्रप्रकरणे वर्ण्यविषयाः

मुहूर्त्तचिन्तामणेः द्वितीयं प्रकरणं नक्षत्रप्रकरणम् अस्ति। अस्मिन् प्रकरणे नक्षत्रसम्बन्धितानां विविधविषयाणाम् उल्लेखः वर्तते। नक्षत्राणां ध्रुव-चर-उग्र-तीक्ष्ण-मृदु-क्षिप्रसंज्ञास्तेषु करणीयानि कार्याणि, ऊर्ध्वमुख-अधोमुखनक्षत्राणि इत्यादि वर्णितानि सन्ति। अनन्तरं नक्षत्राणां स्थितिवशादुत्पन्नानां विविधमुहूर्त्तानां वर्णनम् अस्ति। तत्र वस्त्रभूषणधारणमुहूर्त्त-वस्त्रदोषज्ञानम्, वृक्षारोपण - राजदर्शन-पशुवस्तुवाहनक्रयविक्रय-आभूषणनिर्माण-शस्त्रधारण-शय्यामुहूर्त्ताः वर्णिताः सन्ति। बीजवपन-सस्यच्छेदन-धान्यसङ्ग्रहणमुहूर्त्ताः ततः ग्रहशान्ति-हवन-अग्निवास मुहूर्त्तानाम् वर्णनम्। ततः नवान्नभक्षणाद्यन्ये मुहूर्त्ताः प्रायश्चित्कर्ममुहूर्त्तः, द्विपुष्कर-त्रिपुष्करयोगः, मूलनक्षत्रविचारः, आश्लेषानक्षत्रे जातस्य फलम्, मूलवासः, गण्डान्तदोषाः ततः अन्ते नक्षत्राणां तारा, नक्षत्रस्वरूपं अस्मिन् प्रकरणे अस्ति।

४.४.३ सङ्क्रान्तिप्रकरणे वर्ण्यविषयाः

कस्यचिद् ग्रहस्य एकराशितः अपरस्मिन् राशौ गमनमेव संक्रान्तिः कथ्यते, तथापि लोके सूर्यस्य राशिपरिवर्तनमेव सूर्यसंक्रान्तिः अथवा संक्रान्ति नाम्ना प्रचलितम् अस्ति। अस्मिन् संक्रान्तिप्रकरणेऽपि सूर्यसंक्रान्तिविषयस्यैव निरूपणं वर्तते। तत्रादौ संक्रान्तिकालस्य सप्तवारेषु स्थितिवशात् संक्रान्तीनां विविधसंज्ञाः, संक्रान्तिकालज्ञानम्, अयनसंक्रान्तिः, सङ्क्रान्तिजन्यः पुण्यकालः, जघन्यनक्षत्रास्तत्र सङ्क्रान्तिफलम्, कर्कसंक्रान्तिफलम्, संङ्क्रान्ती-नामूर्ध्वादिसंज्ञा , संक्रान्तिवाहनविचारः, संक्रान्तिजन्मफलम् एवं संक्रान्तिवशात् क्षयमासाधिमास-ज्ञानञ्चास्मिन् प्रकरणे वर्णितम्।

४.४.४ गोचरप्रकरणे वर्ण्यविषयाः

ग्रहाः प्रतिदिनः राशिषु नक्षत्रेषु गतिमन्तः भवन्ति। ग्रहाणां सञ्चरणात् तेषां राशिषुस्थितिरेव गोचर इति नाम्नाभिधीयते। गोचरवशात् अर्थात् ग्रहस्य राशौ नक्षत्रे वा विद्यमानत्वात् यत् फलं तत् गोचरफलम्। इत्थं जन्मकालिकग्रहाणां फलापेक्षया कस्मिंश्चित् मासे, दिने वा ग्रहाणां राशिविशेषे स्थितिवशात् उत्पन्नं गोचरफलं भिन्नं भवति। अतोऽस्मिन् गोचरप्रकरणे, जन्मकालिकराशितः विविध राशिषु ग्रहाणां गमनात् शुभाशुभयोगाः तत्फलम्, चन्द्रगोचरस्य नियमः, ग्रहाणां गोचरवशाद्युत्पन्न शुभाशुभफलानां विचारः शुभफलानां प्राप्त्यर्थमशुभानां परिहारार्थञ्च नवरत्नमुद्रिकाधारणं , ग्रहाणां रत्नम्, ग्रहाणां धातुः, दुष्टतारापरिहारः, चन्द्रगोचरस्य अवस्थाः ग्रहशान्तिस्नानम् एवं गोचरफलनियमाः वर्णिताः सन्ति।

बोधप्रश्नाः

१. मुहूर्त्तचिन्तामणिग्रन्थस्य रचना कदाऽभवत् ?

.....

.....

२. मुहूर्त्तचिन्तामणिग्रन्थरचनायाः प्रयोजनं किम् ?

.....

.....

३. मुहूर्त्तचिन्तामणौ कति प्रकरणानि सन्ति ?

.....

.....

४. मुहूर्त्तचिन्तामणेः प्रथमः प्रकरणः कः ?

.....

.....

५. क्षयमास-अधिमास सम्बन्धिज्ञानम् मुहूर्त्तचिन्तामणेः कस्मिन्प्रकरणे निहितम् ?

.....

.....

४.५ मुहूर्त्तचिन्तामणौ संस्कारसम्बन्धिप्रकरणानि

भवता पूर्वं मुहूर्त्तचिन्तामणिग्रन्थस्य सामान्यमुहूर्त्तसम्बन्धिताः विषयाः पठिताः। इदानीं संस्कारसम्बन्धितानां प्रकरणानामुल्लेखः क्रियते। मुहूर्त्तचिन्तामणौ संस्कारविषयकानि षड् प्रकरणानि सन्ति। तानि प्रकरणानि तेषां वर्ण्यविषयाश्च अत्र निरूप्यन्ते -

४.५.१ संस्कारप्रकरणे वर्ण्यविषयाः

संस्क्रियतेऽनेन श्रौत-स्मार्तकर्मणा इति संस्कारः कथ्यते। अर्थात् येन कर्मणा पुरुषः संस्कारसम्पन्नः भवति तत्कर्म लोके संस्कार इति नाम्ना ज्ञायते। मुहूर्त्तचिन्तामणौ पञ्चममिदं संस्कारप्रकरणमस्ति। अस्मिन् प्रकरणे षोडशसंस्काराणाम् उल्लेखो वर्तते। तत्रादौ अखिलसंस्काराणाम् आधारभूतः रजोदर्शनस्य उल्लेखः वर्तते। प्रथम रजोदर्शनवशात् शुभाशुभचिन्तनं रजोदर्शनस्य शुभाशुभसमयः रजोदर्शनस्नानमुहूर्त्तं च निरूपितम्। पुनः आधानादिप्राग्जन्म-संस्कारसम्बन्धिचिन्तनम्, गर्भाधानस्य उपयुक्तकालः सीमन्तोन्नयनसंस्कारवर्णनं गर्भस्य विविधमासेषु स्थितिः तस्याधिपतिः पुंसवनमुहूर्त्तश्च वर्णितः। तदनन्तरम् उत्पन्नस्य जातकस्य जातकर्म-नामकरणसंस्कारमुहूर्त्तः, सूतकोपरान्त प्रसूतिस्नानमुहूर्त्तः, जातकस्य दन्तोत्पत्यनुसारं फलं, जातकस्य दोलारोहणमुहूर्त्तः, निष्क्रमणमुहूर्त्तः, अन्नप्राशन-भूम्यूपवेशन-ताम्बूलभक्षण-कर्णवेध-मुण्डनसंस्काराणां मुहूर्त्तः - अक्षरारम्भमुहूर्त्तः - विद्यारम्भमुहूर्त्तः, यज्ञोपवीतसंस्कारमुहूर्त्तः उपनयन-क्षत्राणि, छुरिकाबन्धनकेशान्त -समावर्तनसम्बन्धिमुहूर्त्ताणामुल्लेखः अस्मिन् संस्कारप्रकरणे वर्तते।

© राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१४

४.५.२ विवाह-प्रकरणे वर्ण्यविषयाः

चतुराश्रर्मेषु श्रेष्ठो गृहस्थाश्रमः, स च विवाहसंस्कारात् प्राप्यते। अतः षोडशसंस्कारेषु विवाहः प्रमुखः संस्कारः कथ्यते। विवाहादागता भार्या मोक्षस्याधारभूतानां त्रिविधपुरुषार्थानां दायिका भवति, उच्यते हि मुहूर्त्तचिन्तामणौ – "भार्या त्रिवर्गकरणं शुभशीलयुक्ता"। अतः विवाहसंस्कारः शुभे मुहूर्त्ते सम्यक्तया सम्पादनीयः तस्यैव विवाहमुहूर्त्तस्य सम्यग्ज्ञानाय इदं विवाहप्रकरणं निरूपितम्। अस्मिन् प्रकरणे विवाहसम्बन्धिविविधविषयाः निरूपिताः सन्ति। यथा –

विवाहमुहूर्त्तस्य महत्त्वम्, प्रश्नलग्नात् विवाहयोग – वैधव्ययोग – मृतवत्सा-कुलटादियोगानां पूर्वज्ञानम्, विवाहभंगयोगः विवाहेऽनिष्टज्ञानम् तत्परिहारार्थमुपायः, वर-कन्यावरणमुहूर्त्तः, विवाहकालनिश्चयं, विवाहेऽभीष्टमासाः, तेषु मासेषु जन्ममासविचारः, ज्येष्ठवर-कन्यायाः विशेषविचारः, सहोदरविवाहविचारः, विवाहे सूतकादिविचारः, वरकन्ययोर्मेलापकम्, नाडीदोषः तत्परिहारश्च, होरा-द्रेष्काण – द्वादशांश विचारः, गण्डन्तादिदुर्मुहूर्त्ताः, विवाहे पञ्चशलाकाचक्रवेधज्ञानम्, सप्तशलाकाज्ञानम्, विवाहकाले वर्जिताः दशदोषास्तेषां फलं, पञ्चबाणविचारः, उदयास्तसिद्धिः, विवाहे सूर्यसंक्रमदोषः, लग्नदोषाः, लग्नभंगयोगः, विवाहे रेखाविचारः, लग्नभंगापवादः, विंशोपकविचारः, संकीर्णजातीनां विवाहमुहूर्त्तविशेषः, गन्धर्वविवाहमुहूर्त्तः, विवाहाङ्गकार्याणामभीष्टमुहूर्त्ताः, गोधुलिलग्नविचारः, गोधूलिकाले वर्ज्यदोषाः इत्यादि।

४.५.३ वधूप्रवेशप्रकरणे वर्ण्यविषयाः

विवाहस्य एव अङ्गः वधूप्रवेशः अस्ति। विवाहनन्तरं परिणीतायाः कन्यायाः पतिगृहं प्रवेश एव वधुप्रवेशः। अतः अस्मिन् वधूप्रवेशप्रकरणे तत्सम्बन्धिमुहूर्त्तानां विवेचनम् अस्ति। तत्र वधुप्रवेशनक्षत्राणि वधुप्रवेशेऽभीष्टमुहूर्त्तानां विवेचनं चास्ति।

४.५.४ द्विरागमनप्रकरणे वर्ण्यविषयाः

कन्यायाः स्वपितुः गृहात् द्वितीयवारं पतिगृहागमनं द्विरागमनं भवति। द्विरागमने मुख्यतया शुक्रसम्बन्धितदोषस्य विचारः क्रियते। अतोऽस्मिन् प्रकरणे द्विरागमनसम्बन्धि-मुहूर्त्तस्तत्र शुक्रदोषविचारः तत्परिहारस्य च उल्लेखो वर्तते।

४.५.५ अग्न्याधानप्रकरणे वर्ण्यविषयाः

गृहपतिः अग्निहोत्रक्रियायाः सम्पादनार्थम् अग्न्याधानक्रियां सम्पादयति। तदर्थम् अस्मिन् प्रकरणे विविधमुहूर्त्तानां विवेचनम् अस्ति। तत्रादौ अग्न्याधानप्रयोजनम्, अग्न्याधाने लग्नशुद्धिः, अग्न्याधानलग्नात् विविधफलञ्च उपवर्णितम्।

४.५.६ राज्याभिषेकप्रकरणम्

राजसिंहासने प्रशासनिकपदे आरुढकालेऽभीष्टमुहूर्त्तः (इदानीं मन्त्रीणां शपथग्रहणमुहूर्त्तः) अस्मिन् प्रकरणे निरूपितः वर्तते। तत्र अभिषेककाले लग्नशुद्धिः, नक्षत्रशुद्धि तथा अभिषेककाले शुभयोगानां वर्णनम् अस्ति।

४.६ यात्रासम्बन्धिप्रकरणस्य वर्ण्यविषयाः

स्वस्थानात् देशान्तरं नगरान्तरं वा गमनमेव यात्रा। अस्मिन् प्रकरणे तत्सम्बन्धितानां

विषयाणां विवेचनं वर्तते। तत्रादौ यात्रामुहूर्त्तनिर्धारणसम्बन्धिप्रारम्भिकविषयाणां विवेचनं कृतम्। पुनः यात्राप्रश्ने शुभशुकनविचारः, यात्रायां शुभयोगः, यात्रायां शुभदिग्ज्ञानम्, तिथिनक्षत्रशुद्धिः, यात्रायां वार-नक्षत्रशूल-कालशूलविचारः, निषिद्धनक्षत्राणां वर्ज्यघट्यः, कुलाकुलचक्रविवेचनम्, पथिराहुचक्रम् , आवश्यकयात्रायां तिथिचक्रम्, दक्षिणभारतीयानां कृते महाडलनामकयोगः, घातचन्द्रादिविचारः, योगिनीविचारः, युद्धयात्रायां विचारणीय लालाटिकयोगः, यात्रायां मध्यविश्रामकालः, यात्रायां ग्रहभावबलम्, योगयात्राविषयाः, सन्धियात्रा-विजययात्रासम्बन्धि-सिद्धमुहूर्त्ताः, यात्रायां शकुनविचारः, यात्रायां त्रिनवमीदोषः, नक्षत्र-तिथि-वार-दिशादोहदविचारः, यात्रायां वाहनचयनम्, प्रस्थाननियमः, अकालवृष्टिकाले यात्रानिषेधवर्णनं एवं यात्रायाः प्रत्यावर्तने मुहूर्त्तवर्णनम् अस्मिन् यात्राप्रकरणे वर्णितमस्ति।

४.७ वास्तुप्रकरणे वर्ण्यविषयाः

मुहूर्त्तचिन्तामणौ द्वे प्रकरणे वास्तुसम्बद्धे स्तः। तयोः प्रथमं गृहारम्भादिविषयास्तथा द्वितीयं गृहप्रवेशादिविषयाः निरुपिताः।

४.७.१ गृहारम्भ-निर्माणे वर्ण्यविषयाः

अस्मिन् प्रकरणे वास्तुसम्बन्धिज्ञानं निरूपितम्। तत्रादौ गृहनिर्माणपद्धतिः वर्तते। प्रथमं गृहनिर्माणार्थमुपयुक्तनगरचयनं तदर्थं काकिणीविचारः, नगरे उपयुक्तदिक्चयनम्, नगरस्य स्वराश्यनुसारम् आयादिज्ञानम्, गृहारम्भे निषिद्धकालः, शालाध्रुवाकज्ञानम्, षोड्शगृहनामानि, गृहायव्ययादिपदार्थज्ञानम्, गृहवास्तुचक्रज्ञानम्, गृहारम्भस्य अभीष्ट मास-नक्षत्र ज्ञानम्, गृहद्वारानुसारं तिथिविवेचनम्, गृहारम्भे पञ्चाङ्गशुद्धिः एवं राहुमुखविचारः निर्दिष्टः। अनन्तरं चात्र गृह-कूप-जलस्थान -कक्षव्यवस्थाः - गृहारम्भलग्नात् गृहस्य आयुर्ज्ञानम्, लक्ष्मीवृद्धियोगः, गृहारम्भे विविध योगाः, तत्र द्वारचक्रज्ञानवर्णनम् अस्मिन्प्रकरणे निहितम्।

४.७.२ गृहप्रवेशप्रकरणे वर्ण्यविषयाः

गृहनिर्माणानन्तरं गृहे प्रथमवारं प्रवेशः गृहप्रवेशम् कथ्यते। प्रकरणेऽस्मिन् गृहप्रवेशसम्बन्धिविषयाणां विवेचनमस्ति। तत्र गृहप्रवेशे समयशुद्धिवर्णनम्, पुनः यात्रावसाने गृहप्रवेशसम्बन्धिविवेचनं तदर्थमभीष्टमुहूर्त्तः, तिथिलग्नशुद्धिः, वामार्कविचारः, गृहप्रवेशे कुम्भचक्रादीनां वर्णनमस्ति।

बोधप्रश्नाः

६. मुहूर्त्तचिन्तामणेः पञ्चमप्रकरणस्य नाम किम् ?

.....

.....

७. चतुराश्रमेषु श्रेष्ठः कः आश्रमः ?

.....

.....

८. द्विरागमनसम्बन्धिविवेचनम् वधुप्रवेशप्रकरणेऽस्ति सत्यमसत्यं वा ?

.....

.....

© राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१४

९. काकिणीविचारः मुहूर्त्तचिन्तामणौ कस्मिन् प्रकरणे निहितम्?

.....

.....

४.८ मुहूर्त्तचिन्तामणिग्रन्थकर्त्तुः परिचयः

भवता पूर्वं मुहूर्त्तचिन्तामणि ग्रन्थस्य परिचयं तस्य वैशिष्ट्यं तथा च ग्रन्थे प्रयुक्तविषयानां ज्ञानं कृतम्। इदानीम् ग्रन्थकर्त्तुः विषये जानीमः।

मुहूर्त्तचिन्तामणौ आचार्येन श्रीमद्रामदैवज्ञेन स्वपरिचयं लिखितम् - सः स्ववंशवर्णनम् उद्धरति -

आसीद्धर्मपुरे षडङ्गनिगमाध्येतृद्विजैर्मण्डिते।
ज्योतिर्विंत्तिलकः फणीन्द्ररचिते भाष्ये कृतातिश्रमः॥

तत्तज्ज्जातकसंहितागणितकृन्मान्यो महाभूभुजाम्।
तर्कालंकृतिवेदवाक्यविलसद् बुद्धिः सचिन्तामणिः॥

पदच्छेदः

आसीत्/ धर्मपुरे/ षडङ्ग/ निगमा/ अध्येतृ/ द्विजैः/ मण्डिते/ ज्योतिर्विद्/ तिलकः/ फणीन्द्र/ रचिते/ भाष्ये/ कृत/ अति/ श्रमः/ तत्/ तत्/ जातक/ संहिता/ गणित/ कृत्/ मान्यो/ महा/ भू/ भुजाम्/ तर्क/ अलङ्कृति/ वेद/ वाक्य/ विलसद्/ बुद्धिः/ स/ चिन्तामणिः।

अन्वयः

षड्ङ्गनिगमाध्येतृद्विजैः मण्डिते धर्मपुरे ज्योतिर्विद्तिलकः फणीन्द्ररचिते भाष्ये कृतातिश्रमः तत्तद्जातक-संहिता-गणित् (ग्रन्थ) कृत्महाभूभुजामान्यः तर्कालङ्कृतिवेदवाक्यविलसद् बुद्धिः (यस्य) सः चिन्तामणिदैवज्ञः आसीत्।

प्रतिपदार्थः

षडङ्गः = षड्भिः अङ्गैः युक्तः, निगमः = वेदः, अध्येतृ = अध्ययनशीलः (अध्येता), द्विजैः = विप्रैः, मण्डिते = युक्ते, धर्मपुरे = महाराष्ट्रस्य एकं नगरं तस्मिन् , ज्योतिर्विंत्तिलकः = ज्योतिर्विद्सु श्रेष्ठः, फणीन्द्ररचिते = पतञ्जलिमुनिना विरचिते भाष्ये = व्याकरणशास्त्रस्य महाभाष्ये, कृतातिश्रमः = कृतभूरिश्रमः, तत्तद् = तानि स्वल्प-बृहद्ग्रन्थाः, जातक =जातकशास्त्रं (होराशास्त्रं) संहिता =संहितास्कन्धः, गणित = सिद्धान्तस्कन्धः (ग्रन्थं = पुस्तकं) कृत् = विरचितम्। महाभूभुजाम् = महताम् राज्ञाम् (नृपतीनां) मान्यः = सम्मान योग्यः, तर्कं = तर्कशास्त्रं (न्यायदर्शनादिकं), अलंङ्कृति = अलंकारशास्त्रं (साहित्यं, वेद वेदशास्त्रम्), वाक्यं = वचनं, विलसद् = पटुः, बुद्धिः = मतिः, सः = एतादृशः, चिन्तामणिदैवज्ञः = तन्नामधेयः। आसीत्।

व्याख्या

सांगोपाङ्गवेदाध्ययनरते विप्रैः युक्ते धर्मपुरे नामके नगरे ज्योर्तिविद्सु श्रेष्ठः दैवज्ञः पतञ्जलिमुनिरचितमहाभाष्ये कृतभूरिपरिश्रमः, त्रिस्कन्धज्योतिषशास्त्रस्य ग्रन्थकर्ता, तथा च साहित्य -न्याय-वेदशास्त्रेषु कुशलः राज्ञां सम्मानप्राप्तो एकः चिन्तामणि नामधेयः दैवज्ञः आसीदिति।

ज्योतिर्विद्गणवन्दितांघ्रिकमलस्तत्सूनुरासीत् कृती।
नाम्नाऽनंत इति प्रथामधिगतो भूमण्डलाहस्करः॥

यो रम्यां जनपद्धतिं समकरोद् दुष्टाशयध्वंसिनीम्।
टीकां चोत्तमकामधेनुगणितेऽकार्षीत् सतां प्रीतये॥

पदच्छेदः

ज्योतिर्विद् / गण/ वन्दिताङ्घ्रि/ कमलः/ तत्/ सूनुः/ आसीत्। कृती/ नाम्ना/ अनन्त/ इति/ प्रथाम् / अधिगतः/ भूमण्डल/ आहस्करः/ यो/ रम्यां/ जनपद्धतिं / समकरोद्/ दुष्ट/ आशय/ ध्वंसिनीं/ टीकां/ च/ उत्तम/ कामधेनु/ गणिते/ अकार्षीत्/ सतां / प्रीतये।

अन्वयः

तत् सूनुः अनन्त इति नाम्ना प्रथाम् अधिगतः ज्योतिर्विद्गणवन्दिताऽन्घ्रिकमलः भूमण्डलाहस्करः आसीत्। यः दुष्टाशयध्वंसिनीं रम्यां जनपद्धतिं समकरोद् (तथा) च सतां प्रीतये कामधेनुगणिते उत्तमटीकाम् अकार्षीत्।

प्रतिपदार्थ

तत् सूनुः = तस्य (चिन्तामणेः) पुत्रः, अनन्त = तन्नामधेयः इति नाम्ना प्रथां = ख्यातिं, अधिगतः = प्राप्तः, ज्योतिर्विद्गणः = दैवज्ञानां समूहः, वन्दितः = पूजितः, अङ्घ्रिः = पादः, कमलम् = पद्मम्, भूमण्डलाहस्करः = भू = पृथ्वी, मण्डलं = क्षेत्रं, आहस्करः = प्रकाशकः, आसीत् = वर्तते स्म। यः = यः पूर्वोक्तः दैवज्ञः दुष्टाशयध्वंसिनीं = दुष्टानां = खलानां, आशयः = अश्रद्धायुक्तः विचारः शङ्का वा, ध्वंसिनी = नाशकारिणीं रम्यां = शोभनां, जातकपद्धतिं = जातकशास्त्रं, समकरोद् = कारितवान्। (तथा) च सतां = सज्जनानां प्रीतये = प्रीत्यर्थं , कामधेनुगणितेः = कामधेनु इति नाम्ना प्रतिथगणितस्य, उत्तमां = श्रेष्ठां (उपयुक्तं) टीकां = व्याख्यां, अकार्षीत् = कृतवान्।

व्याख्या

पूर्वोक्तदैवज्ञशिरोमणेः चिन्तामणेः पुत्रः अनन्तनामधेयः ज्योतिर्वित्सु प्रपूजितः भूमण्डले ज्योतिषप्रकाशेन प्रकाशकः उत्पन्नो बभूव। स च ज्योतिषशास्त्रे शङ्कान्वितानाम् अश्रद्धान्वितानाञ्च शङ्कानिरासाय। सुमनोहरां जातकपद्धतिं निर्मितवान् तथा विद्वज्जनानां कृते पञ्चाङ्गगणिते सौकर्यार्थं कामधेनुनामकग्रन्थस्य टीकां कृतवान्। इति।

तदात्मज उदारधीर्विबुधनीलकण्ठानुजो ।
गणेशपदपंकजं हृदि निधाय रामाभिधः॥

गिरीशनगरे वरे भुजभुजेषु चन्द्रैर्मिते।
शके विनिरमादिमं खलु मुहूर्त्तचिन्तामणिम्॥

पदच्छेदः

तद्/आत्मजः/उदारधीः/ विबुध/ नीलकण्ठानुजः/ गणेशपद/ पङ्कजं/ हृदि/ निधाय/ रामाभिधः/ गिरीश/ नगरे/ वरे/ भुज/ भुज/ इषु/ चन्द्रैः/ मिते/ शके/ विनिरमात्/ इदं/ खलु/ मुहूर्त्तचिन्तामणिम्।

अन्वयः

तदात्मजः उदारधीः विबुधः नीलकण्ठानुजः रामाभिधः गणेशपदपङ्कजं हृदि निधाय

© राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१४

भुज -भुज- इषु -चन्द्रैः मिते शके वरे गिरीशनगरे इदं मुहूर्त्तचिन्तामणिं खलु विनिरमात्।

प्रतिपदार्थः

तदात्मजः = अनन्तदैवज्ञस्य पुत्रः, उदारधी = उदारबुधियुक्तः, विबुधः = विद्वान्, नीलकण्ठानुजः = नीलकण्ठनामधेयस्य कनिष्ठभ्राता, रामाभिधः = राम इति नामधेयः, (दैवज्ञः) गणेशपदपंकजं = भगवतः गणेशस्य पादपद्मं, हृदि = हृदये, निधाय = धृत्वा, भुजः = द्वे, इषु = पञ्च (कामदेवस्य पञ्चेषवः प्रसिद्धाः) चन्द्रः = एकं, द्वि-षि-पञ्च-एकमिते (१५२२) शके = शकाब्दे, गिरीशनगरे = वाराणस्यां इदं मुहूर्त्तचिन्तामणिग्रन्थे, विनिरमात् = निर्माणमभवत्।

व्याख्या

अनन्तदैवज्ञस्य पुत्रेण उदारमनस्कः विदुषो नीलकण्ठदैवज्ञस्यानुजेन श्रीरामदैवज्ञेन १५५२ मिते शकाब्दे भगवन्तं गणेशं हृदि निधाय (तस्य मङ्गलाचरणपुरस्सरं) काश्याम् इदं मुहूर्त्तचिन्तामणिग्रन्थं विरचितम्।

अर्थात् महाराष्ट्रप्रान्ते नर्मदानद्यास्तीरे एकः धर्मपुरनामकः नगरः वर्तते। तस्मिन्नगरे मातृपुरे ग्रामे षडंगवेदस्य ज्ञातानां द्विजानां समूहे निवसन् श्रीचिन्तामणिदैवज्ञः ज्योतिषशास्त्रेण सह अन्येष्वपि शास्त्रेषु कृतपरिश्रमः महाभाष्यस्यज्ञाता आसीत्। असौ त्रिस्कन्धमर्मज्ञः नृपेण समादृतश्च आसीत्। सः चिन्तामणिदैवज्ञः श्रीरामदैवज्ञस्य पितामह आसीत्। तस्य चिन्तामणेः पुत्रः श्री अनन्तदैवज्ञः ज्योतिर्विद्सु समादरणीयः जातः। तेन तात्कालिकसमाजे ज्योतिषविषयक - विविधभ्रमस्य निराकरणार्थं जातकपद्धतेः रचनाकृता। आर्यभट्टीयसिद्धान्तानुसारं पञ्चाङ्गसाधनार्थं कामधेनु इत्याख्यः गणितग्रन्थः विरचितः। अस्य ज्योतिर्विच्छिरोमणेः अनन्तदैवज्ञस्य पुत्रौ रामदैवज्ञः नीलकण्ठदैवज्ञश्च आस्ताम्। अनयोः रामदैवज्ञः मुहूर्त्तचिन्तामणिप्रतिमाक्षरा-टीकाञ्च व्यरचयत्। अस्यैव रामस्य भ्राता नीलकण्ठः ताजिकनीलकण्ठीग्रन्थस्य रचनामकरोत्। नीलकण्ठस्य पुत्रेण गोविन्ददैवज्ञेन मुहूर्त्तचिन्तामणेः पीयूषधाराटीका कृता। मुहूर्त्तचिन्तामणिग्रन्थस्य रचना श्रीरामदैवज्ञेन १५२२ शकाब्दे (सन् १६०० ई.) वाराणस्यां कृता। प्रस्तुतसारण्याः अस्य स्पष्टं ज्ञानम् भवति।

महाराष्ट्रे /धर्मपुरे/मातृपुरग्रामे



१०. रामदैवज्ञस्य पितामहः कः ?

.....

.....

११. ताजिकनीलकण्ठी कस्य रचना ?

.....

.....

१२. पीयूषधाराटीकाकारः कः ?

.....

.....

१३. मुहूर्त्तचिन्तामणिग्रन्थस्य रचना कुत्र अभवत् ?

.....

.....

१४. रामदैवज्ञस्य पितुः नाम किम् ?

.....

.....

४.९ सारांशः

अयं पाठः मुहूर्त्तचिन्तामणिग्रन्थस्य परिचयात्मकः पाठः आसीत्। अस्मिन् पाठे तृतीये पाठ्यांशे मुहूर्त्तचिन्तामणिग्रन्थस्य रचना, तस्य प्रयोजनं वैशिष्ट्यं च निरूपितम्। अनन्तरं ग्रन्थेऽस्मिन् प्रयुक्तानां विषयाणां विवेचनं कृतम्। तत्र चतुर्थे पाठ्यांशे शुभाशुभ-नक्षत्र-संक्रान्ति-गोचरप्रकरणेषु वर्णितानां विषयाणामुल्लेखः। पञ्चमे पाठ्यांशे संस्कारसम्बन्धितानाम् प्रकरणानाम् उल्लेखः कृतः। तत्र संस्कार-विवाह – वधुप्रवेश –द्विरागमन –अग्न्याधान-राज्याभिषेकप्रकरणेषु वर्णितान् विषयान् ज्ञातवान्। सप्तमे पाठ्यांशे वास्तुप्रकरणानां विषयाणामुल्लेखः तथा अष्टमे पाठ्यांशे ग्रन्थकारस्य परिचयः भवता प्राप्तः।

४.१० शब्दावली

१.	संक्रान्तिः	=	सूर्यस्य राशिपरिवर्तनम्
२.	गोचरः	=	ग्रहाणां चलनम्
३.	संस्काराः	=	प्रसिद्धाः षोडशसंस्काराः
४.	गिरीशनगरं	=	वाराणसीनगरं।

४.११ सन्दर्भग्रन्थः

१. मुहूर्त्तचिन्तामणिः (प्रमिताक्षराटीका)।

© राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१४

४.१२ सहायकग्रन्थाः

१. **मुहूर्त्तमार्तण्डः**, चौखम्भासंस्कृतसंस्थान, वाराणसी।

२. **मुहूर्त्तपदवी**, मोतीलालबनारसीदास, नवदेहली।

४.१३ बोधप्रश्नोत्तराणिः

१. मुहूर्त्तचिन्तामणिग्रन्थस्य रचना १५२२शकाब्दे अभवत्।

२. क्रियाकलापप्रतिपत्तिहेतुः।

३. त्रयोदश प्रकरणानि सन्ति।

४. शुभाशुभप्रकरणम्।

५. संक्रान्तिप्रकरणे।

६. संस्कारप्रकरणम्।

७. गृहस्थाश्रमः।

८. असत्यम्। यतोहि द्विरागमनसम्बन्धिविवेचनाय द्विरागमनप्रकरणम् स्वतन्त्रप्रकरणम् अस्ति।

९. वास्तुप्रकरणे अस्ति।

१०. रामदैवज्ञस्य पितामहः चिन्तामणिदैवज्ञः आसीत्।

११. नीलकण्ठदैवज्ञेन।

१२. पीयूषधाराटीकाकारः गोविन्ददैवज्ञः आसीत्।

१३. मुहूर्त्तचिन्तामणिग्रन्थस्य रचना वाराणस्याम् अभवत्।

१४. रामदैवज्ञस्य पितुर्नाम अनन्तदैवज्ञः आसीत्।

४.१४ अभ्यासप्रश्नाः

१. मुहूर्त्तचिन्तामणिग्रन्थस्य वैशिष्ट्यं निरूप्यताम्।

२. मुहूर्त्तचिन्तामणौ शुभाशुभप्रकरणे वर्णितानां विषयाणामुल्लेखः कर्त्तव्यः।

३. मुहूर्त्तचिन्तामणौ संस्कारसम्बन्धितानि प्रकरणानि कानि?

४. रामदैवज्ञस्य वंशपरिचयः दीयताम्।

—•—

स्वप्नः

संस्कृते पारम्परिक-आधुनिकज्ञानवैदुष्यस्य समन्वयनदृशा
संस्कृतशिक्षायाः वैश्विकपरिप्रेक्ष्यस्य उपस्थानम्।

सङ्कल्पः

- संस्कृतनिष्ठज्ञानसरण्याः उत्तमावबोधस्य सर्जनम्।
- संस्कृतशिक्षान्तर्गतानाम् अभिनवविषयाणां संवर्धनम्।
- आधुनिकसमाजोत्कर्षाय सम्भावनानां प्रकाशनदृष्ट्या संस्कृतभाषायाः तत्साहित्यस्य च प्रासङ्गिकतायाः आविष्करणम्।